रु० आ०

२८ वैयाकरणसिद्धान्तकौमुदी। काशीस्थ राजकीयसंस्कृतपाठशालायां व्याकरणधर्मशास्त्राध्यापकेन नेने इत्युपाख्य पं० गोपालशास्त्रिणा विरचितया टिप्पण्या सहिता। ( यन्त्रस्थ )

२९ फक्किकारत्नमञ्जूषा (सिद्धान्तकौमुदीस्थपङ्क्तिव्याख्यानरूपा ) (स्त्रीप्रत्ययान्तः प्रथमोभागः )। २—०

३० " " " ( कारकादिकृदन्तान्तो द्वितीयोभागः )। २—०

३१ पाणिनीव्याकरणे वादरत्नम्। न्यायव्याकरणाचार्य्यमीमांसकशिरोमणि श्रीसूर्यनारायणशास्त्रि विरचितम्। तत्र च न्यासपरिष्कारपरिशिष्टभेदेन प्रकरणत्रयम् यत्रषड्‌न्यूनसार्धशतसूत्रेषु १४९ महाताटोपेन न्याला विचारताः तत्र प्रथमं प्रकरणं मुद्रितं सद्विक्रयाय सन्नद्धम्। द्वितीयप्रकरणमपि मुद्रितप्रायं शिघ्रमेव भवतां दृष्टिपथमधिगमिष्यतीति )।

प्रथमोभागः। १—८

३२ लघुसिद्धान्तकौमुदी । श्रीमद्वरदराजभट्टाचार्यविरचिता । ( वार्त्तिकपाठ-परिभाषापाठ-धातुपाठ-गणपाठ-सूत्रानुक्रमणिका-पाणिनीयशिक्षासहिता ) पं० श्रीकनकलालशर्मणा विरचितया संक्षिप्तबालबोधिन्या टीकया संवलिता ।

सजिल्द ग्लेज कागज उत्तम संस्करण ०-१२

३३ " " " सजिल्द ग्लेज कागज मध्यम संस्करण ०-१

३४ पाणिनीयशिक्षादिदशपाठसङ्ग्रहः ( १ सभाष्यपाणिनीयशिक्षा, २ अष्टाध्यायीसूत्रपाठः, ३ गणपाठः, ४ वार्त्तिकपाठः, ५ परिभाषापाठः, ६ धातुपाठः, ७ लिङ्गानुशासनम्, ८ उणादिसूत्रपाठः, ९ फिट्सूत्रपाठः, १० नवाह्निकभाष्यवार्त्तिकपाठश्चेत्येतद्दशपाठसङ्ग्रहात्मकोऽयं ग्रन्थः । ) ०—

३५ अष्टाध्यायीसूत्रपाठः । श्रीमत्पाणिनिमुनिविरचितः । ०—

३६ धातुपाठः । श्रीमत्पाणिनिमुनिविरचितः । पं० श्रीकनकलालशर्मणा कृतया धात्वर्थप्रकाशिकया टिप्पण्या समलङ्कृतः । ०—

३७ सिद्धान्तचन्द्रिका । संक्षि



Library IIAS, Shimla
S 491.25 M 687 V
00006378

* श्रीः *

…रिदास-संस्कृत-सीरिज़

१६

॥ श्रीः ॥

व्याकरणम्

# उत्तरपद्यावलिः


प्रकाशकः—

…दास हरिदास गुप्तः—

…स्कृत सीरिज़ आफिस,

…, गोपालमन्दिरके उत्तर फाटक,

…नारस सिटी ।

१९८८



S
491.25
M 687 V
491.25
M687 V

# संक्षिप्त–सूचीपत्रम् ।

INDIAN INSTITUTE OF
ADVANCED STUDY
SIMLA

(लघुशब्देन्दुशेखरस्य व्याख्या नपदान्तसूत्रपर्यन्ता ) । ९-
१३ शाङ्करी । श्रीशङ्करभट्टविरचिता । (लघुशब्देन्दुशेखरस्य परिभाषाप्रकरणपर्यन्तस्य व्याख्यानम् ) । १-
१४ सदाशिवभट्टी । विद्वद्वरसदाशिवभट्टविरचिता । लघुशब्देन्दुशेखरस्य स्त्रीप्रत्ययप्रकरणपर्यन्तस्य व्याख्यानम् ) । ३-

THE

HARIDAS SANSKRIT SERIES

16.

VYAKARANA

# UTTARAPAKSHAVALI

*Edited by–*

PANDIT BRAHMASHANKAR MISHRA

PRINTED–PUBLISHED & SOLD BY

JAI KRISHNA DÂS HARIDÂS GUPTA

*The Chowkhamba Sanskrit Series Office, Vidya Vilas Press,*

*North of Gopalmandir, Benares City.*

1931.

[ ALL RIGHTS RESERVED BY THE PUBLISHER ]

CATALOGUED

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. 6378
Date 15/12/65
SIMLA
S
491.25
M687V
Library IIAS, Shimla
S 491.25 M 687 V
00006378

इस प्रेसमें हर किस्म की छपाई व जिल्द साजी का काम भी होता है।
सर्व प्रकारके संस्कृत ग्रन्थो के मिलने का एक मात्र पताः—

**जयकृष्णदास-हरिदास गुप्तः—**

चौखम्बा संस्कृत सीरिज आफिस, विद्याविलास प्रेस,
गोपालमंदिरके उत्तर फाटक, बनारस सिटी।

॥ श्रीः ॥

हरिदास-संस्कृत-सीरिज़

१६

श्रीः

व्याकरणम्

# उत्तरपत्रावलिः

पण्डितब्रह्मशङ्करमिश्रेण

संशोधिता।

प्रकाशकः—

जयकृष्णदास हरिदास गुप्तः—

चौखम्बा संस्कृत सीरिज़ आफिस,

विद्याविलास प्रेस गोपालमन्दिर के उत्तर फाटक,

बनारस सिटी।

१९८८

अस्य सर्वेऽधिकाराः प्रकाशकेन स्वायत्तीकृताः।

श्रीः

# उत्तरपद्यावल्यामुत्तरितविषयानुक्रमः ।


| | पृ० सं० |
|---|---|
| १ ग्रन्थारम्भः | १ |
| २ धातोस्तन्निमित्तस्यैव | ,, |
| ३ विभक्तिश्च | ५ |
| ४ षात्पदान्तात् | ८ |
| ५ ददातिदधात्योर्विभाषा | ९ |
| ६ चितः | १० |
| ७ आर्धधातुकस्येड्वलादेः | १२ |
| ८ व्यपदेशिवद्भावोऽप्रातिपदिकेन | १५ |
| ९ पूर्वत्रासिद्धम् | १६ |
| १० स्त्रीप्रत्यये चानुपसर्जने | १८ |
| ११ इजादेश्च गुरुमतोऽनृच्छः | २० |
| १२ अतो दीर्घो यञि | २१ |
| १३ ज्योतिरायुषः स्तोमः | २२ |
| १४ रामात्-रामाद् | २३ |
| १५ प्राचां ष्फस्तद्धितः | २४ |
| १६ नञ्स्नञीकक्० इत्यादि | २६ |
| १७ घेर्ङिति | २७ |
| १८ अनेकाल्शित्सर्वस्य | २९ |
| १९ अदर्शनं लोपः | ,, |
| २० द्वित्रिचतुरिति कृत्वोऽर्थे | ३२ |
| २१ इको गुणवृद्धी | ३३ |
| २२ क्ङितिप्रतिषेधे० इत्यादि | ३५ |
| २३ नलोपः प्रातिपदिकान्तस्य | ३६ |
| २४ तस्माच्छसो नः पुंसि | ,, |
| २५ हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् इत्यादि | ३९ |
| २६ न पदान्ताट्टोरनाम् | ४२ |
| २७ ङमो ह्रस्वादचि ङमुण्नित्यम् | ४३ |
| २८ समः सुटि | ४५ |
| २९ सार्वधातुकार्धधातुकयोः | ४६ |
| ३० इदुदुपधस्य चाप्रत्ययस्य | ४८ |
| ३१ आडजादीनाम् | ५० |
| ३२ भूवादयो धातवः | ५३ |
| ३३ अचः परस्मिन् पूर्वविधौ | ५५ |
| ३४ ग्रन्थसमाप्तिः | ५६ |

श्रीगणेशाय नमः ।

# उत्तरपद्यावली प्रारभ्यते ।

विद्याविनोदचतुरं विशादं विघ्ननाशनम् ।
तथाविधं मन्नुदेवं गुरुं वाग्देवतां भजे ॥ १ ॥

प्रश्नावल्यां होरिलस्य ये प्रश्नाः पण्डितैः कृताः ।
तेषां सदुत्तरार्थाय क्रियते ह्युत्तरावली ॥ २ ॥

तत्र तावद् "धातोस्तन्निमित्तस्ये"ति किम् ओयते औयतेति मूलोक्तदोषनाशाय न यकीति न्यासः, तत्समाधानम्—आचारक्विबन्तप्रकृतिककर्तृक्विबन्तगोग्लौशब्दादिभ्यः "तत्र साधुरि"ति यति गोयं ग्लौयमित्यादौ तथा विजन्तभूधातोर्भो इत्यस्माद्यति भोयमित्यादौ च धातोरेव यादिप्रत्ययाभिन्नमित्यस्य वान्तादेशो मा भूदिति न यकीति न्यासो दुष्टः,

इको गुणवृद्धी वदव्रजेरिति ओतश्श्यनीति आदेच उपदेश उपदेशसूत्रस्थभाष्यप्रामाण्यादेजन्तेभ्य आचारक्विपोऽभावे तु भोयमित्यादाववश्यं दोषात् स दुष्ट एवातोऽन्यत्समाधानं विभावयन्तु सुधियः

इत्युक्तम् , तत्र यत् समाधानान्तरमुक्तं भाष्यविरुद्धं तद् धातोरित्यवयवषष्ठ्यैव उश्शम्भूस्तमिच्छति ऊयति आ ऊयति ओयति लङि औयदित्यादौ यथान्यासे न वान्तादेशः क्यजन्तधातोरवयवस्यैवैचो यादिप्रत्ययनिमित्तत्वाभावाद् ; यकीति न्यासे तु स्याद्दोषः, गव्यतिनाव्यतीत्यादौ तु व्यधिकरणषष्ठ्या चिन्त्यो वान्तादेशः, यदि तन्निमित्तस्यैवेत्यनेन यादिप्रत्ययभिन्ननिमित्तस्यैवैचो वान्तादेशव्यावृत्तिरिष्यते तदा स्वाभाविकस्यैवैचो वान्तादेशे सिध्यति गव्यतीत्यादि, सामान्यस्य व्यावृत्तौ तु न सिध्येदिति तत्त्वप्रकाशिकायां स्पष्टम् ,

अकित्तद्धितयोरिति न्यासे यादौ तद्धिते च वान्तादेशनिषेधे तु बाभ्रव्यो गव्यतीत्यादि न सिध्येद् , न यकीति न्यासे ओयते इति न विङ्कितीति न्यासे गव्यमित्यादि च न सिध्येद् वान्तो यि प्रत्यये दृश्यते इति च कृते यद्वा यि प्रत्यये स्वरबहुलमिति कृते यान्तवान्तादेशा बाहुलका इति सिद्धौ बहूनां वान्तविधीनां वैयर्थ्यं तथाऽपि लक्ष्यानुसरणक्लेश इति सुहृद् भूत्वाऽऽचार्यस्तथा न कृतवान् अत एव पाणिनीयानां क्व चित्स्वरव्यकार इत्यापातक-

क्षणस्यास्मदाद्युद्देशेन कृतत्वादेतल्लक्ष्यैकचक्षुष्काणां तं विना लक्षणं लक्ष्यदर्शनमाशङ्क्य नासूया कर्तव्या यत्रानुगम इति भाष्यादननुगम एव लक्ष्यदर्शनंशरणं सति प्रामाण्य इति बोध्यम्,

यत्तूक्तं वान्तो यीत्यस्य तत्सूत्रस्य भाष्याद्धातुविषयकत्वाद्धातोरित्यारब्धमृषिणेति तद्धातुरित्येतत्सूत्रस्थभाष्यविरुद्धं निर्मूलं च, तथा हि प्रकृतसूत्रे भाष्ये एवकारः किमर्थः? नियमार्थः, नैतदस्ति प्रयोजनं सिद्धे सत्यारभ्यमाण उत्तरेणैवकारं नियमार्थं भविष्यति इष्टतोऽवधारणार्थः तर्हि शङ्कव्यमित्यादौ यदि स्यादित्युक्तेः,

यत्तु—असिद्धं बहिरङ्गेतिपरिभाषाया ऊठ्ग्रहणं ज्ञापकम् इति भाष्ये दूषणं दत्तम् ऊठ्ग्रहणं कथं ज्ञापकं प्रौहेत्यादौ विभक्त्युदात्तार्थं तदकरणे ऊडिदंपदाद्यप्पुम्रैद्युभ्यः परासर्वनामस्थानविभक्तिरुदात्ता स्यादिति न प्रवर्तेत इत्युक्तं; तदिष्टापत्तेरदुष्टं वाहः स्थाने य ऊठ् तस्य तेन ग्रहणमिति तद्भाष्यतो लाभात् कथमन्यथा व्यूह इत्यादेरनभिधानमिति विभावय, ज्वरत्वरेत्यादिविहिते ऊठि जूः जूरौ जूरः तूरेत्यादावेव तत्प्रवृत्तेः, तदुक्तं—परिभाषेन्दुशेखरे प्रौह

इत्याद्यसाध्वेव वृद्धेः प्राप्तेः,

अन्ये तु परिभाषाशयं विना न विधानं वर्णयन्ति ऊडिदमित्यत्र वविदमेवास्तु कोऽर्थोऽस्य दीर्घऊकारो यत्र वाशब्दस्य ह्रस्व उकारो यत्र ततः परा ऽसर्वनामस्थानविभक्तिरुदात्ता स्यादिति, आद्यस्य जूरः जूरित्यादि द्वितीयस्य विश्वौह इत्याद्युदाहरणंवश्च वाश्च वौ द्वन्द्वे कृते लोपो व्योरिति वलोपः ऊश्च उश्चेति दीर्घह्रस्वावुकारौ ताभ्यां पराऽसर्वनामस्थानविभक्तिरुदात्तेति तदर्थः, वो इदमित्यत्रात्रादेशः, इदमपि समाधानं संदिग्धं क्लिष्टं लोपो व्योरिति सूत्रस्थवकारप्रत्याख्यानपरभाष्यविरुद्धं चेत्यरुचेरुक्तं दीर्घोच्चारणमूठोऽस्यां परिभाषायां ज्ञापकं सम्प्रसारणे निमित्ते गुणे वृद्धिरचीति वृद्धौ विश्वौहइत्यादिसिद्धेरिति तदपि चिन्त्यम् ,

दीर्घोच्चारणस्यैत्येधत्यूठस्विति विशेषणार्थत्वं शेखरे स्फुटं जनानवति इति जनौरित्याद्यर्थमुक्तत्वाद् , ज्वरत्वरेत्यत्रापि ह्रस्वकरणेऽक्षद्यूरित्याद्यसिद्धेः, एतेनोडिदमित्यत्रापि ह्रस्व एव पठ्यते तत्परास्तम् ,

किं च चतुरनडुहो नद्यजादीत्यस्याग्रे वाह इति

षठित्वा वाहः परे नद्यजादी उदात्ते स्त इत्येव सिद्धे ऊठ्ग्रहणं व्यर्थमित्युक्त्वा वाहनद्या उदात्तविधाना-द्वाह इति ङीब्विधिरपि नापूर्व इति भाष्याशयः, तस्याप्यन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमास-इत्यस्याग्रे पाठेन ज्ञापकपरभाष्यप्रामाण्येन तस्य व्यवस्थितविभाषापरत्वादिष्टसिद्धिरित्युक्तं, तदपि न, वाह इत्युक्ते ऊडिदमित्यत्रोठोऽकरणे जूर इत्यादौ स्वरासिद्धिः, तत्रोठि कृते वाह इत्यस्यापि करणे वाह इति ङीब्विधिज्ञापकसिद्ध इति लाघवं यथा-याति तथाऽप्यनभिधानमेव शरणं तत्रापि कथम-न्यथा वाहो ङीप् ज्ञापकादूङेति तर्क्यतां तस्यापि यूस्त्र्याख्यावितिति नदीत्वात् कथं वा श्रीमद्भिः प्रवाहै-रित्यादौ परादिवद्भावेन वाह इत्यनेन प्राप्तः स्वरो-बाधात्, किं च तस्य वाह्यमयन्ते इत्यस्य वाह इत्यादौ त्वदुक्तव्यवस्थितविभाषाश्रयणं च प्रमाणं किं चोठः स्वरस्य विश्वौह इत्यादौ इष्टत्वज्ञापकपरिभाषाविरोध-एवेति तत्स्वराभिधानस्य भाष्यकारानभिमतत्वमेव लभ्यत इति दिक्।

यत्तु विभक्तिश्चेति व्यर्थं प्रदेशे क चिद्यथायथं-सुप्तिङ्ग्रहणेन चेष्टसिद्धेः अष्टन इत्यत्र सुपीत्येवास्तु

त्यदादीनाम इत्यत्र सुपीत्यनुवृत्तौ यत्र तत्रेत्यादावव्रत्वं तु प्राग्दिशीयानां सुप्संज्ञयैव सिद्धे सुपि चेत्यत्र सुपि यभि इति न्यासेनैतर्हीत्यादावदोषः, सुपो धातु-प्रातिपदिकयोरिति सुपो लुक् सुप्पितावित्यनुदात्तता च न त्रल्तसिलादीनां विधानसामर्थ्यात् त्रलादौ लित्करणाच्चेति विभावयन्तु सुधिय इत्युक्तम् ।

तत्र विभक्तिसंज्ञा च लादौ प्रयोजनमिदमस्ति इदम इशादेशे ऊडिदमिति स्वरेण तस उदात्तत्वमिति प्राग्दिशीय इत्यत्र भाष्ये स्पष्टं ततस्तृतीयादित्वमेतद्भाष्यगौरवादितिच कैयटे तत्र किं यदुक्तं त्रलादीनां सुप्संज्ञायां सुपो धात्विति लुङ् व तेन विधानसामर्थ्यादिति,

तन्न—

तद्धिते सति प्रातिपदिकसंज्ञा तस्यां च तद्धितलोप इति संनिपातविघातादेवालुक्सामर्थ्येन अलुक्कर्त्तुमशक्यम् अव्ययसंज्ञायां तद्धितान्तात्सुपो लुग्, एवं प्रयोजनसत्त्वात् तस्मादित्याद्यर्थे तादित्यादेः प्रयोगफलस्य सत्त्वात् प्राग्दिशइत्यत्र कैयटे उक्तम्,

ननु मध्येऽपवाद इति न्यायादनुदात्तौ सुप्पितावित्येव स्वरं विभक्तिस्वरो बाधते न तु लित्स्वरं लि-

त्स्वरं, लित्स्वर एव तु परत्वाद्विभक्तिस्वरं बाधते, नैष। दोषः—ऊडिदमित्येतत्सूत्रं लितीत्यत्रानुवर्तते लित्स्वरं बाधित्वा विभक्तिस्वरो भवति तृतीयादिग्रहणेन तृतीयामारभ्य प्राग्दिशः प्रत्ययो गृह्यत इति, किं च दानीमो प्रस्येत्संज्ञानिषेधाय विभक्तिसंज्ञेति स्पष्टं तत्र भाष्ये, अन्यथा मिदच इत्यन्तादचः परं स्यादिति तत्र कैयटे स्पष्टं, दानीमोऽदन्तत्वस्वीकारे दोषाभावेऽप्युक्तस्थले तस उदात्तत्वफलं विभक्तिसंज्ञायाः प्रयोजनम् इति भाष्ये स्थितं प्राग्दिशीयानां सुप्संज्ञायां सुप्तिङुत्पमा इति दानीमो प्रस्येत्वं न, ऊडिदमित्यत्रापि सुबेव संबध्यते सावेकाच इत्यत्रापि विभक्तिस्थाने सुप्करणादित्यदोष इति चेत्तर्ह्यष्टाविवाचरतीत्याचाराक्विबन्तादष्टनूशब्दाल्लुटस्तिपि शपं बाधित्वा परत्वात्प्रतिपदोक्तत्वाद्विभक्तिग्रहणसामर्थ्याच्च नस्यात्वेऽष्टातीति कृते तन्न स्यात् तस्मादष्टन इति विभक्तिग्रहणं कार्यं तसादीनां विभक्तिसंज्ञेष्टव्येति केचित्,

अथ वाऽष्टन आ सुप्तिङीत्येवास्तु तसादीनां सुप्संज्ञैवास्तु विभक्तिश्चेति न कार्यमित्यन्ये,

यदि विभक्तिश्चेत्यस्य प्रत्याख्यानेऽत एवाग्रहणं तर्ह्यतिलाघवात्प्राग्दिशीयानां मा भूतां विभक्तिसु-

त्संज्ञे किं तु त्यदाद्यत्वफलाय त्यदादीनाममप्राग्दिशीयतसादौ चेति पठ्यतां प्राग्दिशीय इति न कर्तव्यं सुपि यमीति च तथाऽष्टन इत्यत्र सुप्तिङ्ग्रास्तु दानीमो मस्य यथा नेत्वं तथोक्तमेव, इत इत्यन्तोदात्तस्तु तत्त्वप्रकाशिकायां स्पष्टं, घुण घूर्ण भ्रमणे अत्रोपधायां चेति दीर्घे सिद्धे दीर्घोच्चारणं प्रक्रियालाघवार्थमिति शेखरग्रन्थः; स चायुक्तः मूर्च्छादिषु दीर्घीकरणेऽत्र लेखकप्रमादेन दीर्घकरणात् ऊर्जेरपि दीर्घोच्चारणं तथैवोपधायां चेति सूत्रकरण एव लाघवाद्गुर्णोतेर्नुलोपश्च महति ह्रस्वेति वचनादुकारस्यैव दीर्घ इत्यलम् ।

षात्पदान्तात्—पदान्तात्षकारात्परस्य नस्य णत्वंनेत्यर्थः, निष्पानं दुष्पानम्, अत्र कृत्यच इति वा भावकरणयोरिति वा णत्वं प्राप्तम् अत्र मनोरमायांपदान्तात्किं पुष्णातीति प्रत्युदाहृतं,

तदयुक्तं ष्टुत्वेन सिद्धेरिति शङ्का तत्समाधानं तु रषाभ्यामिति सूत्रे भाष्ये वकारग्रहणमुत्तरार्थं षात्परस्य नस्य ष्टुत्वेन निर्वाहात् ,

एवञ्च षात्पदान्तादित्यनेनापि ष्टुत्वस्यैव निषेधः पदान्तग्रहणाभावे पुष्णातीत्यत्र ष्टुत्वनिषेधे

रूपासिद्धिः स्पष्टैवेति पण्डिताः,

वस्तुतस्तु षग्रहणमुत्तरार्थमिति रषाभ्यामित्यत्र भाष्येऽदर्शनाद्वाध्यसामान्यचिन्तया पदान्तात्षात्परस्य नस्य णत्वमात्रं निषिध्यत इत्यर्थः,

न च षण्णामित्यत्रापि निषेधस्स्यादिति वाच्यम् ?

पदेऽन्तः पदान्त इत्येव भाष्ये सुसर्पिष्केणेत्यादौ णत्वासिद्धये व्याख्यानात् पदस्थनकारस्यैव णत्वनिषेधात्,

एवञ्च पदान्तग्रहणाभावे सुसर्पिष्केणेति प्रत्युदाहर्तुमुचितमिति भाष्यदर्शिनः, न हि सुसर्पिष्केणेत्यत्र ष्टुत्वं लभ्यमिति दिक्।

दधातिदधात्योर्विभाषा,

अनुपसर्गादेतयोर्विभाषा शः श्याद्व्यधेति णस्यापवादः शपक्षे तु जुहोत्यादित्वाच्छपः श्लुः श्लाविति द्वित्वं ददः दधः पक्षे णः दायः धाय इति अनुपसर्गादित्येव प्रदः प्रध इति मूलं तत्र पण्डिताः इदं सूत्रं मास्तु दद दाने दध धारणे आभ्यां पचाद्यच् ददः दध इति श्याद्व्यधेति णे युक्ति दायः धाय इति च सिद्धेरित्याशङ्क्य समाहितम् अचि कृते न ददः अददः अत्र नञ्तत्पुरुषे तत्पुरुषे तुल्यार्थ-

तृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्या इत्यनेनाव्ययपूर्वपदप्रकृतिस्वर इष्यते तम्बाधित्वा अचूकावशक्तौ अजन्तं कान्तं चान्तोदान्तं स्यादशक्ताविस्यन्तोदात्तः स्यादिति,

वस्तुतस्तु समासात्प्रागेवान्तरङ्गत्वादचूकावशक्तावित्यन्तोदात्ते निवृत्ते सति शिष्टत्वेनाव्ययपूर्वपदप्रकृतिस्वरः सिद्ध एव किन्त्वभ्यस्तानादिरित्याद्युदात्तार्थं प्रदध इति व्यावृत्त्यर्थं दाञ्धाञोरपि ददधयोः सिद्ध्यर्थं च वचनं तदपि रूपद्वयं विभाषाग्रहणं विनैवानुबन्धवैरूप्याद्वा सरूपसूत्रेण णशप्रत्ययाभ्यां सिद्धं विभाषाग्रहणं नानुबन्धकृतमसारूप्यमिति ज्ञापनार्थमिति वासरूपसूत्रे भाष्ये स्पष्टम् । चितः, अन्त इत्यनुवर्त्तते चितोऽन्त इत्यर्थः, अत्र वार्तिकम्-चितः सप्रकृतेर्बह्वकजर्थमिति शेखरेऽस्यार्थः-चित्प्रत्ययप्रकृतेरन्त उदात्त इति तदर्थो न तु प्रत्ययमात्रस्यान्त इति, अत्र चाकचश्चित्वं ज्ञापकमन्यथा कच एकाचूकत्वेन प्रत्ययस्वरेणैवोदात्तत्वे सिद्धे तदर्थं व्यर्थं सदत्र ज्ञापकमिति तास्यनुदात्तेण्ङिदुपदेशाल्लसार्वधातुकमन्ह्विङोरित्यत्र शेखरे त्वस्मात्परं लसार्वधातुकमनुदात्तं न्हुङधीङौ वर्जयित्वे-

त्यर्थः रुणद्धीत्यत्र श्नमो मित्त्वेन परश्चेत्यस्य बाधे तत्संनियोगशिष्टप्रत्ययाद्युदात्तं बाधकमित्युक्तम्, अयं ग्रन्थः परस्परविरुद्धः—यथा मित्त्वेन परश्चेत्यस्य बाधे तत्संनियोगशिष्टप्रत्ययाद्युदात्तत्वस्यापि बाधः, एवमकच्यपि प्राकृटेर्ग्रहणेन परश्चेत्यस्य बाधे तत्संनियोगशिष्टप्रत्थयाद्युदात्तस्याप्रात्यास्ऽकचश्चित्त्वस्य ज्ञापकतावर्णनमयुक्तमिति विरोधः,

अत्र नवीनैरित्थं परिह्रियते—उभयशब्दस्य सर्वादौ पाठो ऽव्यर्थ इति प्रघट्टके भाष्यग्रन्थे कश्चेदानींकाकचोः स्वरे रूपे वा विशेषोऽस्तीत्युक्त्वाऽकचि संनियोगशिष्टन्यायस्याश्रयणे प्रमाणाभाव इत्यन्यदपि विभातयन्तु सुधिय इति ।

यत्त्वत्रोक्तं—चितः स्थाने चित्प्रत्ययप्रकृतेरन्तोदात्त इति वार्त्तिकार्थस्तन्न शोभनम्—अच्प्रभृतिप्रत्ययस्य कुण्डिनजादेरप्रत्यस्य चेह ग्रहणामिति कैयटविरोधाद् बह्वकजर्थमिति प्रतीकमुपादाय बह्वकचोऽन्तोदात्तत्वे कार्ये चितः सप्रकृतेरिति वचनमिति कैयटविरोधाच्च बह्वकच्प्रत्ययवती या प्रकृतिस्तस्या अन्त उदात्त इत्येवार्थो वार्त्तिकस्य, एतद्वार्तिकप्रत्याख्यानपरभाष्यप्रामाण्याच्चायमर्थः—; तथा हि—तर्हि वक्त-

ऽयं पूर्वसूत्रनिर्देशत्वात् चित इति भाष्यं चित्त्वात्समु-
दायोऽन्तोदात्त इत्यर्थः, कुण्डिनजादयोऽपि व्य-
पदेशिवद्भावाच्चिदन्ता उच्यन्त इति कैयटः,चित इत्य-
नेन चित्वतोऽग्रहणेऽकच एकाच्कत्वेन प्रत्ययस्वरे-
णैवान्तोदात्तत्वं सिद्धम् , तस्य चित्करणाच्चित्वत-
इत्यर्थो लभ्यते सप्रकृतेरिति बह्वकजर्थमुपादीयते तेन
कुण्डिनप्रकृतिष्वदोष इत्युक्तम् , चित इत्यनेन चित्व-
तो ग्रहणे पुत्रकाम्यादिषु चित्प्रत्ययान्तेषूपयोगाभा-
वेन बह्वकजर्थमित्युक्तम् , तथैवोदाहृतं च भाष्ये बहु-
च् बहुभुक्तमित्यादि अकच् सर्वकैरुच्चकैरित्यादि च
यतः शेखरयोर्विरोधोद्भावनं तत्र ञ्नमो मित्त्वेन प-
रस्येत्यस्य बाधेऽपि प्रत्यय इत्यस्य प्रकृतिरिष्यत-
एव प्रत्ययत्वं विना लशक्विति शस्येत्संज्ञानापत्तेः,
प्रत्ययत्वे ह्याद्युदात्तः संनियोगशिष्टः केन वार्य्येत
अकचि तु प्राक् टेर्ग्रहणात्परश्चेत्यस्य बाधेऽकचः प्र-
कृतिप्रत्ययविशिष्टस्य प्रत्ययत्वे प्रामाण्यफलयोरभा-
वाच्चित इत्यनेन चित्वतः प्रकृतिप्रत्ययोराविशेषेण
ग्रहणात्संनियोगशिष्टन्यायसंचारः काकदन्तपरीक्षा-
वदाभातीति चित इति सूत्रे भाष्ये स्पष्टम् ।

आर्द्धधातुकस्येड्वलादेः ।

अङ्गसंज्ञानिमित्तस्य वलादेरार्द्धधातुकस्येडिति-सूत्रार्थः, अत्र शेखरे—आर्द्धधातुकस्येति किम् जुगुप्सत इति, अत्र सूत्रे भाष्ये ऋत इद्धातोरिति पदमुच्चार्य विहितस्य वलादेरिति व्याख्ययाऽत्र दोषाभावादार्द्धधातुकग्रहणं प्रत्याख्यातम्, रुदादिभ्यः सार्वधातुक इति नियमादास्ते शेत इत्यादावदोष इति स्थितम्, स्यसिच्सीयुडित्यत्र भाष्ये त्वङ्गस्येण् मा भूदित्यार्द्धधातुक इत्यनुवर्त्य योगविभागमाश्रित्य यावानिट् स सर्वोऽप्यार्द्धधातुकस्येडित्युक्तं; तत्परस्परविरुद्धं शेखरग्रन्थोऽपि भाष्यविरुद्धः, अत्रेत्थं-विरोधोद्धारं कुर्वन्ति पण्डिताः—विधिसूत्रप्रयोजनं-नास्तीति प्रत्याख्यानं; योगविभागार्थतया प्रयोजनोक्तिः, जुगुप्सत इति शेखरग्रन्थस्त्वार्धधातुकग्रहण-मनुवर्त्योक्त इति,

अत्रेदं तत्त्वम्—स्यसिच्सीयुडिति सूत्रस्थं भाष्यं तावदेकदेशिसूत्रकाररीत्या प्रवृत्तम्, एवं सप्तमे योगविभागः करिष्यते—आर्द्धधातुकस्येट् यावानिट् नाम स सर्व आर्द्धधातुकस्य भवतीति विज्ञेयं ततो-वलादेरिति वलादेरार्द्धधातुकस्येट् भवतीति भाष्यम्, आर्द्धधातुकस्य इत्यस्य प्रत्याख्याने योगविभागस्यै-

कदेशयुक्तत्वं स्फुटमेव, शेखरोऽपि युक्त एव, तथा हि—आर्द्धधातुकस्येति सूत्रे भाष्ये किमार्द्धधातुकस्येतिपदाभावे वलादेरङ्गस्याप्रत्ययस्येडिति विप्रतिपत्तिं कृत्वा यद्येतत्पदाभावेऽङ्गस्येडापद्यते तत्पदसत्त्वेऽप्यार्द्धधातुकस्य यदङ्गं तस्येडित्यापादयितुं शक्यत्वात्तत्राक्रियमाण एवेष्टं विज्ञास्याम इत्युक्तम्,

अनेन लक्ष्यशरणं सूत्रकारस्यापीति दर्शितम् , इदन्तर्हि प्रयोजनम् इह मा भूद् आस्ते शेते एतदपि नास्ति प्रयोजनं रुदादिभ्यः सार्वधातुक इत्येतन्नियमार्थं भविष्यति रुदादिभ्य एव सार्वधातुके इड् भवति नान्येभ्य इति,

अत्र कैयटः-सार्वधातुक एवेति नियमस्तु रुदविदेति क्त्वासनोः कित्त्वविधानान्न भविष्यति अनिट्सनौ रुदादेर्हलन्ताच्चेति कित्त्वस्य सिद्धत्वात् क्त्वोऽनिट् औपदेशिककित्त्वसद्भावादिति, एवमपि वृक्षता अत्र प्राप्नोति धातोरिति वर्तते.एवमपि लूभ्यां पूभ्यामत्र प्राप्नोति एवन्तर्हि विहितविशेषणं धातुग्रहणं धातोर्यो विहितः,

ननु च धातोरेवायं विहितः, न चायं धातोरित्येवं विहितः क्व पुनर्धातुग्रहणं प्रकृतम् ऋत इद्धा·

तोरिति तद्वै षष्ठीनिर्दिष्टं पञ्चमीनिर्दिष्टेन चेह विहितं शक्यते विशेषयितुम्, अथेदानीं षष्ठीनिर्दिष्टेनापि निहितं शक्यते विशेषयितुं शक्यमार्द्धधातुकग्रहणमकर्तुमिति प्रकृतसूत्रे भाष्ये स्थितम्, लुभ्यामित्येतत्समानमेव जुगुप्सत इत्यार्द्धधातुकग्रहणाभावेऽप्यदोष एव सनोऽनार्द्धधातुकत्वफलं गुणाभाव एव तेनेड्गुणौ नेति फलन्तु भाष्यमते फलितार्थकथनपरं जुगुप्सत इति प्रत्युदाहरणं च।

व्यपदेशिवद्भावोऽप्रातिपदिकेनेति,

पूर्वादिनिस्सपूर्वाच्चेति योगविभागेन ज्ञापितेऽयमन्यथैकयोगं पूर्वात्सपूर्वादिनिरित्येव कुर्य्यात्,

न चात्र पृथग्योग इष्टादिभ्य इत्यत्र सपूर्वादित्यस्यानुवृत्तिर्न स्यादेवं चानिष्टीति न सिध्येदिति वाच्यम्,

ज्ञापकपरं येन विधिरितिसूत्रभाष्यप्रामाण्यादानिष्टीत्यस्यासाधुत्वाद् एकयोगेऽपि तावद् उत्तरत्रानुवृत्तौ बाधकाभावाच्च, अत एव नान्तादसंख्यादेरिति सार्थकमन्यथाऽत्रापि व्यपदेशिवद्भावेन पञ्चम इत्यादावपि संख्यादित्वात्तद्वैयर्थ्यं स्पष्टमेवेति परिभाषेन्दुशेखरे स्पष्टम्, अत्रैष विचारो मन्दप्रयोजनः।

पूर्वत्रासिद्धम् ,

सपादसप्ताध्यायीम् उत्तरत्रास्य पाठात्पूर्वत्र पदेन तस्या ग्रहणात्त्रिपाद्या असिद्धत्वं प्रतिसूत्रे उत्तरत्रसम्बन्धात्फलितस्त्रिपाद्यां पूर्वं प्रति परमसिद्धमित्यर्थः, एवमर्थे श्चुत्वं धुटि सिद्धं वाच्यमित्यादिवार्तिकानि प्रमाणानि फलं गोधुङ्मानित्यादिसिद्धिः अन्यथा पूर्वपूर्वशास्त्रप्रवृत्तौ घत्वजश्त्वानुनासिकेषु सत्सु भष्भावो न स्यादिति शब्दरत्नोक्तिः, सा विरुद्धेति पदान्ते भष्भावस्य न्याय्यत्वात् तत्समाधानं जश्त्वापवादत्वेऽप्यनुनासिकत्वापवादत्वाभावाच्चत्र कृते भष्भावो न स्यात् जश्त्वकृत इत्यत्र जश्त्वाप्राप्ताविन्यर्थ इति पण्डितोक्तिरसम्बद्धा जश्त्वे कृते इति मूलाभावे जश्त्वप्राप्ताविति व्याख्याया दूरापास्तत्वात् ,

वस्तुतस्तु पौर्वापर्याश्रयणाविरोधेन पूर्वपूर्वप्रवृत्त्या चर्त्वभष्भावजश्त्वानुनासिकानां प्रवृत्तौ नैवानिष्टं किञ्चित् किन्तु घत्वे कृते झय इति मतोर्मस्य तत्त्वापत्तिरेव शेखरोक्ता सुष्ठु इति चिन्त्यं सुधीभिः,

अत्र यद्यपि लोकेऽनाहार्यज्ञानस्यैव प्रवर्तकत्वम् इष्टं तथाऽपि शास्त्रप्रामाण्यादाहार्यारोपस्य शास्त्रप्रवृ-

त्तात्रप्रवृत्तौ च नियामकत्वमिति बोद्धव्यमिति शेखरः,

लोकेऽनाहार्य्येत्यादि नियामकइत्यन्तमुक्तम्,

तस्यायंभावः-यथा भूतले घटोऽस्तीत्यादौ भूतलाधिकरणकघटकर्तृकसत्त्वात्यन्ताभावबुद्धिः प्रतिबन्धिका एवमेतात्रिपादीस्थशास्त्रं सिद्धमेव तत्रापि त्रिपादीस्थकर्तृकसम्भवज्ञानं प्रतिबन्धकम् एवं च पूर्वशास्त्रं प्रति त्रिपादीस्थमसिद्धमित्यनुपपन्नमेव स्यादतोऽदर्शनरूपे लोपेऽभावारोपस्य रुकूपत्वेन मनोरथइत्यादावदोषोऽभावाभावस्य प्रतियोगिस्वरूपत्वात्,

न चोत्वदृष्ट्या रोरित्यस्यासिद्धत्वमिति वाच्यम्?

दीर्घविधिसामर्थ्यादाश्रयासिद्धत्वाद्, अत्र समाधानं-कर्मणो रोमन्थेत्यादिनिर्देशेन यत्र शास्त्रान्तरदृष्ट्याऽसिद्धत्वं नास्ति तत्रैवाश्रयासिद्धत्वमत्र तु हशि चेत्येतत्प्रवृत्त्यापि रोरित्यस्योत्वमिति नाश्रयासिद्धत्वमन्यद्विभावयन्तु पण्डिताः,

वस्तुतस्तु यौगपद्येन शास्त्रद्वयप्रसङ्गे शास्त्रासिद्धत्वपक्षे रोरीत्यस्याप्रकृत्य ढूलोपाभावेन लोपशास्त्रस्यैवाप्रसङ्गः काय्यासिद्धत्वरलोपे हशि चेत्यतः परत्वाल्लोपे इति दीर्घेऽपि हशि चेत्यन्तरङ्गे प्रतिपदद्वयसापेक्षबहिरङ्गदीर्घस्य पूर्वत्रासिद्धमिति रलोपस्या

सिद्धत्वादुत्वमेव

किञ्च कर्मणो रोमन्थेत्यादिनिर्देशेनासिद्धवचनं-किमर्थमादेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थं चेति भाष्येण तत्रत्यकैयटाविवरणाभ्यां शास्त्रासिद्धत्वस्यैवा-श्रयणाददोष इति दिक् ।

स्त्रीप्रत्यये चानुपसर्जन इति,

अनुपसर्ज्जने स्त्रीप्रत्यये तदादिनियमो न उपस-सर्जने तु भवत्येव करीषन्धेरपत्यं स्त्रीत्यर्थे तस्यापत्य-मित्यणि अणिञोरनार्षयोरिति ष्यङित्यणः ष्यङादेशे चापि च रूपम् कारीषगन्ध्यायाः पतिः कारीषगन्धी-पतिः परमकारीषगन्धीपतिः ष्यङः सम्प्रसारणं पुत्रप-त्यास्तत्पुरुष इति सम्प्रसारणं यथाऽत्र भवति तथा प-रमकारीषगन्ध्यायाः पतिः परमकारीषगन्धीपतिरत्रापि भवति स्त्रीप्रत्ययस्य पतिं प्रत्युपसर्ज्जनत्वेऽपि परमश-ब्दार्थं प्रत्यनुपसर्जनत्वात् कारीषगन्ध्याशब्दस्यापि ष्यङन्तत्वात्करीषगन्ध्यामतिक्रान्ताऽतिकारीषगन्ध्येति विग्रहेऽतिक्रान्तार्थम्प्रति स्त्रीप्रत्ययस्योपसर्जनत्वात्तदादि-नियमसत्वादतिकारीषगन्ध्याशब्दस्यापि ष्यङन्तत्वा-न्न संप्रसारणम्,

अत्र पण्डिताः–इयं परिभाषा न कर्त्तव्या ष्यङो-

ऽनुपसर्जनस्य सम्प्रसारणमित्यादिसूत्रकरणात्,

अत्र समाधानं—परमा कारीषगन्ध्या यस्य स परमकारीषगन्ध्यः विनाऽपि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्य इति परमपदस्य लोपे कारीषगन्ध्यस्य पुत्र इति विग्रहे कारीषगन्धीपुत्र इतीष्यते स न स्याद् अतः परिभाषयैव वारणम्,

यद्यपि संज्ञासत्तायां विषयै पूर्वोत्तरपदलोपे सत्या भामा भीमो भीमसेन इत्यादि तदुदाहरणात्तथापि स्तोः श्चुनेत्यत्र योगेः संयोगेः सम्पदस्य सत्या भामेत्यादाविव विनाऽपीत्यत्र लोपादिति शेखरे विरो इति वदन्ति, एतच्च परिभाषावर्णनं तस्याः प्रयोजनान्तरं नास्तीत्याभिमानेनैव, वस्तुतस्त्वतिखट्वायेत्यत्र याड्वारणम् परमखट्वायै इत्यादौ तद्भावनं परमकारीषगन्ध्याशब्दः प्रत्ययग्रहणपरिभाषया ष्यङन्तो न भवति इति परिभाषाश्रयणमनुपसर्जनत्वात्तदादिनियमेनाष्यङन्तमपि तथेति ध्वानितं भाष्ये पूर्वपदलोपोऽप्यत्र चिन्त्यः बहुधनोऽल्पधन इत्यादावपि तदापत्तेः,

यत्तु योगपदे सम्पदलोपोदाहरणं तत्र युजेरेव संयोगार्थकत्वेनादोषाद् अत एवाव्यवहितश्चुत्व सिद्धये स्तो श्चौ श्चुरित्युक्तं भाष्ये, सूत्रकारमते

ऽपि स्पष्टप्रतिपत्तये संयोगपदाध्याहार एवोचित इति दिक्,

इजादेश्च गुरुमतोऽनृच्छः,

इजादेः किम् वव्रौ गुरुमतः किम् उवोष अनृच्छः किम् आनर्च्छ,

न च ऋच्छत्यृतामिति लिटि गुणविधानसामर्थ्यादाम्न भविष्यति किमनेन पर्युदासेनेति वाच्यम्?

गुणविधानसामर्थ्येनामा व्यवहितेऽपि तत्प्रवृत्तेरिति शेखरे समाहितम्, तत्राशङ्का-सूत्रेऽनृच्छे इति पदाभावे आनर्च्छेत्यत्राम् प्राप्तः गुणोऽपि प्राप्तस्तत्र प्रतिपदोक्तत्वादपवादत्वाच्च गुणे कृत इजादित्वाभावादामः प्राप्तिरेव नेति व्यर्थमनृच्छपदम्, अत्र समाधानम् विभावयन्तु सुधिय इति पण्डिताः,

शेखरपाङ्क्तिस्त्वित्थम्,

न च ऋच्छेर्लिटि गुणविधानसामर्थ्यादेव तत्सार्थक्यादिति सूत्रतात्पर्यादिति अनया पङ्क्त्या भाष्यसिद्धान्तोऽप्यागत इति सूचितम्, तथा हि इयेषेत्यादावाम्व्यावृत्तये उपदेशे गुरुमतोऽनृच्छइति उक्त्या एवं तर्हि उच्छेराम्वक्तव्यः अनृच्छ इति ज्ञापकाद-

नौपदेशिकस्यापि गुरुमत्त्वस्याश्रयणे उञ्च्छांचकारे-त्यादावसिद्धा इयेषेत्यादावतिप्रसङ्गमाशङ्क्य उभयं न वक्तव्यमुपदेशग्रहणम् न करिष्यत कस्मान्न भवति इयेषेत्यादावुक्तं वा किमुक्तं संनिपातविरोधादि-त्यनृच्छग्रहणं व्यर्थमेवेति भाष्ये स्थिते पूर्वशेखरेऽनृ-च्छ इति पर्युदासमाश्रित्यैचो गुरोरनृच्छ इत्येव सिद्धे रादिग्रहणं मतुब्ग्रहणं च स्पष्टार्थमित्युक्तम् इजादि-गुरुमतेनैवानृच्छ इति पर्युदासः सार्थको नान्यथेति तद्भावस्तदपि चिन्त्यमेव; संयोगे गुरुमत्त्ववतामेव ग्र-हणापत्त्या इङ्गतौ इत्यादीनामसंग्रहापत्तेः इचो गुरो-रिति सामर्थ्यान्नायं दोषोऽन्यथाऽनृच्छ इत्येव ब्रूया-दिति चेत्तावताऽपीचो यदि गुरुमत्त्वस्याश्रयण इङा-देरसंग्रहः उञ्च्छादेरेव संग्रह इति दोषसद्भावाद्, व-स्तुतस्तु गुर्विजादेरित्युक्त्येतरत्कर्तुमशक्यमथ वा गुर्वादेरित्येवमस्तु दयायासश्चेत्यत्रासग्रहणादकारगु-र्वादेश्चेत्तर्ह्यामेवेति नियमात्सिद्धेः, न वा सेरौपदेशिका-कारगुर्वादित्वेनैतद्विषयकनियमे शाल्वादिप्रभृतिष्वा-म्स्यादिति वाच्यम् , लाघवेन सामान्यनियमाश्रय-णादिति दिक् ।

अतो दीर्घो यञीति,

INSTITUTE OF ADV

सार्वधातुके किम् केशवः अङ्गना केशाद्वोऽन्य-तरस्यामिति वः,

अत्र के चित् सार्वधातुकग्रहणं मास्तु सुपि चेति सूत्रनियमादेवादोषात् सार्वधातुकभिन्ने यजादौ दीर्घश्चेत्तर्हि सुप्येवेति केशवशब्दादामप्रवृत्तेः,

समाधानन्तु- राजभ्यामित्यादावपि दीर्घापत्तिरिति अतो दीर्घस्य सुब्विधित्वाभावेन न लोपः सुप्स्वरेति न लोपासिद्ध्याभावात्सुब्तद्व्याप्यधर्म्माश्रयविधौ च सुब्विधित्वादिति समाधानान्तरं तु तत्त्वप्रकाशिकायां द्रष्टव्यम् ।

ज्योतिरायुषः स्तोमः समासेऽङ्गुले सङ्ग इत्यतस्समास इत्यनुवर्तते आभ्यामुत्तरस्योत्तरपदावयवस्य स इत्यर्थः, अत्र मूले समासे किम् ज्योतिषः स्तोम इत्युक्तम् तत्र इण्कोरित्यधिकारात् किन्तु ज्योतिःस्तोमोऽस्ति ब्राह्मणानामिति प्रत्युदाहर्त्तुमुचितमिति पण्डिताः,

के चित्तु समास इत्यस्य निवृत्तावप्यस्य पदविधित्वात्समर्थपरिभाषया समास एवास्य प्रवृत्तिरिति समासग्रहणं चिन्त्यप्रयोजनमित्याहुः, तन्न–

पदाधिकारस्यापदान्तस्य मूर्धन्य इत्यतः प्रागेव

निवृत्तेर्भाष्य उक्तत्वात्,

वस्तुतस्तु मूलाशय इत्थं योज्यः–नुम्विसर्जनीयशर्व्यवायेऽपीति षत्वस्य सात्पदाद्योरिति निषेधस्यापवादोऽयं तेन नुम्विसर्जनीयेति सम्बध्यत इति वाक्येऽपि प्रवृत्तिः,

न च प्रत्येकमिति व्याख्यानान्निस्त्व इत्यत्रैवात्राप्रवृत्तिरिति वाच्यम्?

एवं तर्हि समस्तान्यत्र भीरुष्ठानाग्निष्टुदग्निष्टोम ज्योतिष्टोमादीसन्तं समासे किम् इत्यनेन तदधिकारीयभीरोः स्थानमित्यादित्रिसूत्री किमर्थेति प्रश्नाशयः, असमासवृत्तिविरहात्पुष्यर्था सेति तदुत्तरमित्यन्ये।

रामाद्रामादित्यत्र मूले जश्त्वं वाऽवसान इत्युक्तम्, पूर्वं चर्त्वासिद्ध्या जश्त्वमिति मनोरमा अपवादत्वाज्जश्त्वं बाधित्वा चर्त्वं ततो जस्त्वमिति शेखरः जश्त्वाप्राप्तिविषये चर्त्वस्याचारितार्थ्यादपवादत्वसङ्गतेरिति शेखराशयः, अस्योपरि दूषणान्तरं षड्शब्दादौ पूर्वं षस्य ष एव चर्त्वं ततो जश्त्वं ष एव श्रूयते जश्त्वमित्यादयः षडिति निर्देशेन षस्य टकार एव न तु

धकार इति परिहारेऽपि पूर्वापरविरोधः शेखरस्या-स्त्येव उपानदित्यत्र घत्वजश्त्वचर्त्वानीति तदुक्तेः, किञ्च चतुर्णामित्यत्र णत्वं द्वित्वमिति प्रतीकमुपादाय ननु द्वित्वं णत्वमित्येव युक्तम् पूर्वत्रासिद्धीयमद्वित्वे इति वचनादिदं वर्णद्वित्वेऽपि प्रवर्तते वाक्क वागिति भा-ष्यादोहरणाद् द्वित्वदृष्ट्या चर्त्वस्यासिद्धत्वाद्धस्यैव द्वित्वं तस्य चर्त्वे पूर्वत्र गश्रवणापत्तेरित्युक्तम् अ-स्मादपि पूर्वं जश्त्वं पश्चाच्चर्त्वमित्यायातीति पण्डिताः, पदान्तविषये पूर्वं जश्त्वमिति न्याय्यमेव वाऽवसाने इत्यस्यापदान्तझलां चर्त्वविधानेन चारितार्थ्याद् अत्र पदाधिकाराभावाद् अनुकरणं चानितिपरमिति ज्ञाप-कादनितिपरस्याप्यनुकरणस्य सत्वादवसाने त्यदा-द्यनुकरणे त्यत् तद् इत्यादौ पक्षे चर्त्वस्यापीष्टत्वात् , नत्विदमयुक्तं न ह्यनुकरणत्वभङ्गभिया शास्त्रस्य बाध-श्चमत्कारतामुपैति पटदिति इत्यादिष्वव्यक्तानु-करणस्यात्–इताविति शास्त्राणाममन्तृत्वापत्तिः तेषां-वैयर्थ्यापत्तेश्चेत्यलं विस्तरेण ।

प्राचां ष्फस्तद्धितः गार्ग्यशब्दात्ष्फः आयनादेशे यस्येति चेति तद्धितनिमित्त इकारलोपः तद्धितान्तत्वे प्रयोजनं प्रातिपदिकसंज्ञा च ष्फान्तस्य तेन षिद्गौरेति

सिद्धश्च ङीषिति, तत्र सवर्णदीर्घेण षित्त्वसामर्थ्याद-प्रातिपदिकत्वेऽपि ङीषा च सिद्धिमाश्रित्य तद्धितग्रहणं प्रत्याख्यातं, गोकक्ष्यशब्दो गर्गादियञन्तस्तस्मात्क्रौड्यादिभ्यश्चेति क्रौड्यादिगोकक्ष्यशब्दात्ष्यङ् ततो यञश्चेति चाप् गौकक्ष्या ततः ष्फप्रत्यये विवक्षिते संज्ञायां भस्याढे तद्धिते इति पुंवद्भावे चोपानिवृत्तिः ष्फप्रत्यये षित्वान्ङीप् गौकक्ष्यायणीति सिध्यति, पुम्वद्भावश्च तद्धितत्व एव ष्फस्य संगच्छते पुम्वद्भावाभावे यञन्तत्वविरहात्ष्फो न स्यादिति कस्यचित्समाधानं न युज्यते, तथा हि—गौकक्ष्यशब्दपाठस्य क्रौड्यादिषु भाष्ये प्रत्याख्याततत्वात् , गौकक्ष्येति तु षाद्यञश्चेति चापि सिध्यति, मास्तु क्रौड्यादित्वात्ष्यङ्,

न च गौकक्ष्यायणीति न सिद्ध्येच्चापः ष्फप्रत्ययस्यापवादत्वादिति वाच्यम् ?

प्राचां ष्फ इत्यत्र सर्वत्रेति सूत्रात्सर्वत्रेत्यपकृष्य-प्राचां सर्वत्र ष्फविधानात् , गौकक्ष्येति तूदीचां मते सेत्स्यति, एवञ्च गौकक्ष्यापुत्र इत्यादौ ष्यङन्तत्वाभावेन ष्यङः सम्प्रसारणमित्यस्याप्राप्त्या गौकक्ष्यायाः सम्प्रसारणप्रतिषेधो वक्तव्य इति वार्तिकमनारम्भणीयमित्यपरमनुकूलम् ,

किञ्च ष्फप्रत्यये विवक्षिते भस्यादे तद्धित इत्यस्य प्रवृत्तिरनुचितैवायनादेशोत्तरमेव भसंज्ञायाः प्रवृत्तेः किञ्च ष्यङन्ते यन्नन्तत्वविरहेण ष्फस्याप्रवृत्तेः,

किञ्च तद्धितग्रहणमन्यतोऽपि विधानार्थं तेनासुरेरुपसंख्यानं नापूर्वमिति कैयटोऽप्येकदेशी, तथा हि-आसुरेरुपसंख्यानमित्यस्याग्रे भाष्ये छश्चेति वक्तव्यमासुरीयः इत्युक्तं तत्र सिद्धान्तः कैयटे आसुरिणा प्रोक्त इति विशेषेऽर्थेऽणश्चेत्यणि प्रायश्छ एव क्रियते लाघवादन्यथा द्विरासुरीयग्रहणं कर्तव्यं स्यादिति,

एतेनोपसंख्यानस्यावश्यकत्वे प्राचामिति सूत्रस्य भाष्ये तद्धितग्रहणप्रत्याख्यानमेवाद्रियेत इति तत्त्वप्रकाशिकायां द्रष्टव्यम् ।

टिड्ढेत्यत्र वार्त्तिकम्-नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानमिति तेन ङीप्यन्तानुदात्ताविमौ गौरादिङीषि त्वन्तोदात्ताविति ग्रन्थकाराः; तत्र पण्डिताः वार्त्तिके गौरादौ चानयोः पाठो मास्तु बह्वादिष्वेवानयोरस्तु पाठस्तत्र पाठान्ङीष् सिद्धः पक्षे वयस्यचरम इति ङीबिति स्वरद्वयसिद्धिरिति समाधानं विभावयन्तु सुधिय इति,

अत्रेदं तत्त्वं तरुणतलुनशब्दौ त्रोरश्च ल इति

उरन्प्रत्ययान्तौ यौगिकौ तरति प्रथमं वयस्तरति दुःखमिति वा यद्वाहौणादिः तदपि ङीप्सिद्धये गौरादिपाठ आवश्यको नेह वठयस्यचरम इति प्राप्नोति, एतच्च वयस्यचरम इति ब्रुवता तरुणतलु-नयोरुपसंख्यानं कुर्वता वार्त्तिककारेण सूचितं, सूत्र-कारमतेन प्रथमवयोवाचिन एव ग्रहणात्तरुणतलुनयो-रग्रहणमेव सर्वथेति गौरादिपाठस्तयोरिति बोध्यम् , मध्यान्हे तरुणो रविरित्यादौ प्रचण्डो रविरित्याद्यर्थ-आवश्यकः, तरुणशब्दः प्रौढपर्यायोऽपि, अथ तदर्थको-यदा तरुणशब्दः प्रयुज्यते वा तरुणतात्पर्येण वृद्धे-ऽपि प्रयुज्यतेऽथवा प्रौढार्थको गृह्यते तत्तात्पर्येणो-पसंख्यानमिति ।

घेर्ङितीति, अत्राङ्गस्य सुपीति चानुवर्त्तते, अत्र पण्डिताः-घेर्ङीत्येवास्तु यस्मिन्विधिरिति परिभाषया तदादिविधौ ङादौ सुपीत्यर्थेण सिद्धे ङिद्ग्रहणं व्यर्थ-प्रायोगिकङादेरसम्भवादौपदेशिकङादित्वं गृह्यते प्रवाहुशब्दात्तृतीयैकवचनस्थाने आङ्याजरेत्याङादेश-स्तु ङादेश एवास्तु प्रवाहवेत्यादिसिद्धये, मत्यामित्या-दौ तु ङेरामादेशे तस्य ङादित्वाभावादाण् नद्या इति न प्रवर्तते ङितिकरणे त्वनुबन्धकार्य्यत्वाद-

नलित्वधावपि स्थानिवत्त्वाज्जायते यद्यपि तथाऽपि ङेः रामित्यत्र ङेर्ङामित्युक्ते न कश्चिद्दोष इति प्रश्नः,

अत्रोत्तरं ङामादेशे कृते लशक्तित्संज्ञा आण्नद्या इत्याट् च प्राप्तौ तत्राडागमस्याङ्गत्वाद्वार्णपरिभाषयान्तरङ्गाया अपीत्संज्ञाया बाधे ङकारश्रवणापत्तिरागमस्य नित्यत्वमपीति केचित्समादधत्ते,

वस्तुतस्तु इत्ग्रहणं स्पष्टार्थम् आण् नद्या इत्यादौ सेनान्यामित्यादौ ङामादेशश्चरितार्थ इति नद्यावन्ते परत्वान्ङामादेशः सकृद्गतिन्यायादाडागमाप्रवृत्तेर्यणा रूपसिद्धेः नुट् स्यादिति वाच्यम् ,

निरनुबन्धपरिभाषया आम्ग्रहणेन ङामोऽग्रहणादत एव सानुबन्धो ङामादेशश्चरितार्थः,

न चैवं रीत्या नुडभावेऽपि आट इव याट्स्याटोरप्यप्रवृत्तिः स्यादिति वाच्यम् ?

लक्ष्यव्यवस्थापकावेतौ न्यायौ पुनः प्रसङ्गेति सकृद्गतेतिवल्लक्ष्यानुरोधाद्याट्स्याटावित्यदोषात् कथमन्यथाऽटि कृतेऽपि यदागमन्यायात्परादिवद्भावाद्वाऽऽमत्वेन प्राप्तस्य नुटो वारणं भाष्योक्तं सङ्गच्छेत आमादेशे परत्वात्कृते पुनःप्रसङ्गादाट् तस्मिन्कृते तकृद्गतिन्यायान्नुटोऽभाव इति भाष्यमते यथा सि·

द्धिरिष्टस्य तथाऽत्र पक्षे ङामि कृते सकृद्वृत्त्याऽऽटो-
भावः पुनःप्रसङ्गाश्रयेण याट्स्याटोः प्रवृत्तिरेव न
भेदो; रूपसिद्धिः समैव, अथ वा भवत्वाट् ङस्येत्संज्ञा
तु लशक्वित्यत्रोपदेशोऽजित्यत उपदेशपदानुवृत्त्या
सेत्स्यति प्रत्ययस्योपदेशे आदिभूतं यल्लशकु तस्येत्सं-
ज्ञेति व्याख्यानात् एतच्च चुटूइति सूत्रे भाष्ये ध्वनितं-
तथा हि चुञ्चुप्चणपोश्चकारप्रतिषेध इति वार्त्तिकप्र-
त्याख्यानाय भाष्ये उक्तं यकारादौ चुञ्चुप्चणपौ
किं यकारो न श्रूयते लुप्तनिर्दिष्टो यकार इति अत्र
यकारे लुप्तेऽपि प्रत्ययादिश्च इतीत्संज्ञाप्राप्त्योपदेश
आदिश्चकारो नास्तीति तात्पर्यं फलं कल्प्यम् साम-
र्थ्यकल्पनाया अनौचित्यादेवञ्च लशक्वित्येतत्सूत्रेऽपि
साहचर्य्येणोपदेशपदानुवृत्त्याऽदोष इति तत्वप्रका-
शिकायां द्रष्टव्यम् ।

अनेकाल् शित्सर्वस्य,

अत्र शेखरः—नानेकालशिदिति तु नोक्तं तन्न
युक्तम् अनन्तरत्वादादेः परस्येत्यस्यैव निषेधे हि
ङिदनेकाल् अलोऽन्त्यस्येत्येवान्त्यस्य सिद्धे ङि-
च्चेति व्यर्थमेवेत्यत्रानन्तरन्यायो न प्रवर्त्तते अत्र स-
माधानं कुर्वन्तु सुधिय इति,

अत्र पण्डिताः–

यद्यप्येतत्कौस्तुभेऽप्युक्तम् अन्त्यस्यादेरिति चानुवर्त्यानेकाल् शिदाद्यन्तयोर्नेति ङिदनेकालोऽन्त्यार्थे ङिच्चेत्यारब्धव्यमिति तथापि युक्तः शेखराशयः, ङिच्चेत्यारम्भात् पदबाधे कृशात्पदलाघवाद्यथान्यासमुचितमिति ।

अदर्शनं लोपः,

अत्र षष्ठी स्थान इत्यनुवर्तते तेन षष्ठ्यन्तस्य स्थाने यददर्शनं तल्लोपसंज्ञेत्यर्थः तेन त्रपु इत्यत्र क्विपोऽप्रसङ्गात्तददर्शनस्य लोपसंज्ञाऽभावाद्ध्रस्वस्य पितीति तुक् न भवतीत्याह प्रसक्तस्येति तदुक्तं शेखरे तस्मात् त्रपु इत्यत्र क्विपोऽदर्शनस्य सत्त्वेन न प्रत्ययलक्षणेन तुगापत्तिर्दोष इति न चायं शेखरग्रन्थः स्थानिवत्सूत्रस्थभाष्यविरुद्धस्तथा हि भाष्ये शब्दस्य नित्यत्वाद्बुद्धेरेव स्थानिताऽऽदेशता चेति पक्षे सेनानीरित्यादौ कर्मण्यण् वृद्धिः क्विब्वुद्धेरिति स्थानिवत्त्वेन वृद्धिः प्राप्नोतीत्याशङ्क्य षष्ठीनिर्दिष्टस्य स्थाने यत्रादेशस्तत्रैव स्थानिवदिति समाहितं प्रकृते क्विपः प्रातिपदिके प्रत्ययलक्षणे न तुगापत्तिः प्रत्ययलक्षणसूत्रेणापि स्थानिवद्भाव एवानूद्यत इति चेन्न ?

त्रपु इत्यत्र दोषाभावेनैवात्र भाष्ये ग्रामणीरित्यत्राणप्रसङ्गे प्राप्ते क्विप्प्रसङ्गबुद्धेरेव स्थानिवद्भावाद्बुद्धिमाशङ्क्य योऽत्राणप्रसङ्गः क्विपाऽसौ बाध्यते इत्युक्तम् सत्सूद्विषेति क्विपोऽविधानादणोऽत्राप्रसङ्ग इति कैयटः, अस्माद्भाष्यात्षष्ठीनिर्दिष्टस्य स्थानिवद्भावो बोधित एव त्रपु इत्यत्र तु अण इव क्विपः प्रसङ्गो नास्तीति तत्र प्रत्ययलक्षणप्रदर्शनमेकदेशिन इति तत्त्वम् , ग्रामे तिष्ठतीत्यत्र ल्यबन्तार्थनिरूपितार्थाधिकरणत्वाभाववत्क्विबन्तार्थानिरूपितधात्वर्थक्रियायाः प्रकृत्यर्थत्वाभावाच्च प्रकृते षष्ठीस्थाने इत्यस्य भाष्येऽनुवर्त्तितत्वाच्च,

वस्तुतस्तु स्थानिवत्सूत्रोक्तषष्ठीनिर्दिष्टस्यादेशः स्थानिवदितिभाष्येणैव गतार्थता प्रकृतसूत्रे षष्ठीस्थाने इत्यस्यानुवृत्तिप्रदर्शनं भाष्ये स्पष्टार्थमेवेति,

यत्तु–अदर्शनमिदित्येवास्तु अदर्शनस्येत्संज्ञा तस्य लोप इति न कर्तव्यमुपदेशेऽजित्यादिसूत्रैरदर्शनस्यैव विधानादिति तन्न कृत्रिमाकृत्रिमयोः कृत्रिमस्यैव ग्रहणे भृञामित् तिष्ठतेरित् प्रत्ययः स्यादित्यादिष्वित्पदेनादर्शनप्रतीत्यापत्त्या लक्ष्यासिद्धेः तपरसूत्रस्य कृदित्यादिविषयं स्यात्तक्कौण्डिन्यन्यायेनेत्य·

दर्शनबोधिका संज्ञा स्यान्न तु तत्कालबोधिकेति संज्ञयोर्विरोधाच्च समावेशासम्भवः इदित्येकमात्राकालिकेकाररूपस्य भावस्य दर्शनरूपत्वाभावात् तपर सूत्रेणास्याः संज्ञायाः बाधेऽस्या निर्विषयतापत्त्योपदेशेऽजित्यादीनां स्वरूपमात्रबोधकतापत्तिः स्यात् इदितो नुमित्यस्य त्वयमर्थः स्यात् इदिकारोऽदर्शनं यस्य सामर्थ्यात् यस्येकारो नास्ति अनभभृतेस्तस्यैव नुम् स्यात् चितिप्रभृतेरिकारवतो न स्यात् अथाऽपि कथं चिदन्तेदित इति व्याख्यानात्स्यादु भृजामिदित्यादिष्वतपरानिर्देशेन निर्वाहे तु अदर्शनामिदिति सुवचमेव ।

द्वित्रिश्चतुरिति कृत्वोर्थे,

अत्र शेखरः इसुसोरिति उत्तरसूत्ररीत्या सुच इति सूत्रयितुमुचितम्, सुजन्तस्य पदस्येत्यर्थादिति अत्र दूषणं चतुष्करोतीत्यत्र इदुपधस्येति नित्यषत्वापत्तिः सुच इत्यस्यासिद्धत्वात् अप्रवृत्तेः, सिद्धान्ते तु चतुर्ग्रहणसामर्थ्यान्नासिद्धत्वमित्यदोष इति,

अत्र समाधानमिदुदुपधस्येत्यत्रापि सम्बन्धापत्तेः सिद्धान्ते तु चतुर्ग्रहणसामर्थ्यान्नासिद्धत्वमित्यदोष इति भाष्ये तु इदुदुपधस्येत्यनुवर्त्य कृत्वोर्थइत्येव सूत्र-

चमिति स्थितम् तदुपपत्तिस्तु सुच इत्येव सिद्धे गुरुभूतनिर्देशादत्रासिद्धत्वमिति चतुष्करोतीत्यत्रेष्टो विकल्पः संपन्न इति तत्त्वप्रकाशिकायां द्रष्टव्यम् ।

इको गुणवृद्धी सूत्रप्रयोजनम्वार्तिकमिग्ग्रहणमात्सन्ध्यक्षरव्यञ्जननिवृत्त्यर्थमिति, अत्र कैयटः—अकारस्याकारे रूपे विशेषो नास्तीत्युक्तमिति,

अत्र केचिद्विशेषं दर्शयन्ति अकारस्याकारे गुणे कृते पेचिथेत्यत्र न शसददवादिगुणानामिति निषेधादेत्वाभ्यासलोपो न स्यात्, वस्तुतस्तु विशेषो नास्त्येव थलि च सेटीत्यारम्भसामर्थ्यान्न विशेष इति पेचिथेत्यत्रैव ववरिथ ससरिथेत्यादावपि निषेधानापत्तिः नशसददेतिसूत्रे गुणस्य तु न वैयर्थ्यम् पपरतुः पपरुरित्यादावृच्छत्यृतामिति गुणे कृते एत्वाभ्यासलोपनिवृत्त्या चारितार्थ्यात् ,

अत्र केचिदित्थं समाधानं कुर्वन्ति केवलदीर्घस्थानिकगुणविषये न शसेत्यस्यसावकाशत्वेऽपि गुणग्रहणमपहाय तत्स्थाने इग्ग्रहणमेव ऋग्रहणं वा कुर्यात् सामान्येन गुणग्रहणसामर्थ्याद्विजातीयस्थानिकविजातीयगुणस्यैव ग्रहणादत्र विजातीयस्थानिकाविजातीयगुणस्याभावादिति कैयटग्रन्थे न काप्यनुपपत्तिः

अथ वा थलि च सेटीतिसूत्रस्थभाष्यरीत्या न शसददे- त्यत्र गुणग्रहणं गुणावयवपरं गुणावयवो योऽकार- स्तस्य निषेधस्तच्च नुनविथेत्यत्रैव संभवतीत्यदोष इति पण्डिताः,

वस्तुतस्तु अकारान्तधातोरेवाकारस्याकारे गुणे कृते न विशेषतेति कैयटाशयः अका- रोपधहलन्ते तु अलोऽन्त्यस्येति हल एव गुणः नाचः इक्परिभाषाया अभावात् अथ पुकि अन्तः लघ्वी उपधा पुगन्तश्च लघूपधाचानयोः समा- हारः पुगन्तलघूपधमिति समासमाश्रित्य व्यधि- करणान्वयादङ्गावयवलघूपधाया गुण इति व्याख्या- नमालम्ब्य पेचिथेत्यादौ विशेषोक्तिसम्भवोऽपि न युक्तः वार्तिकप्रयोजनम् प्रत्याख्यान एवास्य प्रकार- स्य भाष्ये उक्तत्वात् किं च अयं प्रकारो न वार्त्तिकसम्मतोऽन्यथाकारसंध्यक्षरेत्याद्येव ब्रूयादा- त्सन्ध्यक्षरेति न ब्रूयात् पुगन्तस्याङ्गस्य गुण इति सामानाधिकरण्येनान्वयेऽलोऽन्त्यपरिभाषोपस्थिति- पक्ष एव वार्त्तिक आदित्युक्तिस्सङ्गच्छते पुगन्तलघू- पधस्येति सूत्रं तु उपधावतोऽङ्गस्य चेत्तर्हि लघूपध- स्येति नियमार्थं स्यात्तेनेहितोहितेत्यादौ गुणो गोप-

यतीत्यादौ नियमबाधोऽनुगुण एवेति तदपि न; व्यपदेशिवद्भावेन तत्त्वात्,

किङ्ति प्रतिषेधे तन्निमित्तग्रहणं कर्त्तव्यं किम्प्रयोजनम् उपधारोरवीत्यर्थं न वक्तव्यं ज्ञापकात् प्रतिषेधो भविष्यति यदयमिकोज्झल् हलन्ताच्चेति सनः कित्वं शास्ति तज्ज्ञापयत्याचार्यो भवत्युपधानुपधा वा तस्यापि निषेध इति ग्रन्थः,

अत्र के चित् हलन्ताच्चेति सूत्रस्य न वैयर्थ्यं-हलस्सनि सन्यङोरिति द्वित्वेऽत्र लोपोऽभ्यासस्येत्यभ्यासलोपे दम्भ इच्चेति हलन्ताच्चेति सनः कित्वे धिप्सतीत्यत्रानिदितामिति नलोपार्थत्वात् कित्वस्य दम्भ इच्चेत्येव सिद्धेर्हलन्ताच्चेति सामान्यस्यारम्भात् समाधानन्तु स्वाजिदृशोर्झल्यमकिति सनीको झल् दम्भेरिति लघुनोपायेन सिद्धे हलन्ताच्चेति ज्ञापकमेवेति पण्डिताः

वस्तुतस्तु दम्भेरित्युक्ते सनि मीमाघुरभशकपतपदामच इसिति मीमादीनामित्यादेशे मित्सतीदित्सतीत्यादौ गुणाभावार्थं हलन्ताच्चेति सनः किन्वार्थमावश्यकं तथा सनीवन्तर्द्धेतीडागमाभावे दुर्धूर्षतीत्यादिसूत्रारम्भ एव सिध्यति ज्ञापकपरभाष्ये त्वय

माशयः प्रतिलक्ष्य लक्षणभेदः यद्यपि नलोपामागमाभा-
वयोश्चरितार्थो विधिस्तथाप्युपधागुणनिषेधार्थो हलन्ता-
च्चेत्यचारितार्थं इति ज्ञापकत्वं तस्येति ।

नलोपः प्रातिपदिकान्तस्य,

अन्तग्रहणमत्र ज्ञापकम् पदस्येत्यधिकारः तत्क-
चित्स्थानषष्ठी क चिदवयवषष्ठी तेन मादुपधायाश्च
मतोर्वोऽयवादिभ्य इत्यत्रावयवषष्ठीत्वे पदावयवमतोर्मस्य व इत्यर्थे
वृक्षवन्तावित्यादौ वत्वसिद्धिरन्यथा वृक्षवानित्यत्रैव
स्यान्न तु वृक्षवन्तावित्यत्रेति शेखरे स्थितम् ,

वस्तुतस्तु व्याख्यानादेतल्लब्धमन्तग्रहणं स्पष्टार्थ-
मिति पदस्येत्यत्र भाष्ये ध्वनितं तत्र हि नलोपः प्रत्या-
ख्यायते स्थाने षष्ठी अन्तग्रहणाद्वा नलोप इत्युक्तम् ,
लाघवाद्व्याख्यानेनैव षष्ठ्यर्थनिर्णये षष्ठी स्थाने इति
योगोऽन्तग्रहणं च न कार्यमिति भाष्याशयः ।

तस्माच्छसो नः पुंसि,

ननु शसो नुम् इत्येव सूत्रमस्तु अकः सवर्ण इ-
त्यतोऽकीत्यनुवर्त्याकः परस्य शसो नुम्स्यादित्यर्थः,
परत्वान्नुमि पश्चात्प्रथमयोरिति पूर्वसवर्णदीर्घे संयो-
गान्तलोपे सिद्धं रामानित्यादि लिह इत्यादावकः परो
न शस् एतान् गाः पश्येत्यत्रापि औतोऽम्शसोरि-

त्येकादेशआकारे कृते शस्परत्वाभाव इति दोषाभाव इति चेन्न

त्रिश्वप इत्यादावातो धातोरित्यालोपे पूर्वस्मादपि विधावचः परस्मिन्निति स्थानिवद्भावेऽकः परः शस इति नुमापत्तेः, पञ्चमीसमासप्रत्याख्यानपक्षे तु न दोषः अष्टाविंशत्रौशादेशे आत्वे कृते नुमस्यादिति वाच्यम् , नकारस्यात्वं परनिमित्तं बहिरङ्गमन्तरङ्गे नुमि कर्त्तव्ये तस्यासिद्धत्वादकः परत्वाभावात् अथ वा औशादेशः क्रियते प्रियतिस्र इत्यादौ त्वचि रेण बाधः, अत्र समाधानं कुर्वन्तु सुधिय इति पण्डिताः ।

अत्रेदं समाधानं–रामानित्यत्र पूर्वसवर्णदीर्घे नित्यत्वात्कृते पश्चात्सकारस्य नुमापत्तिः मित्त्वसामर्थ्यात्पूर्वं नुम् चेत्कार्यकालपक्षेऽन्तरङ्गेऽद्कुप्वाङिति णत्वे कर्तव्ये संयोगान्तलोपस्यासिद्धत्वापत्तिः अत्र पक्षेऽसिद्धत्वाश्रयणे तस्मादित्येव लिङ्गम् ,

अथ मित्त्वसामर्थ्यान्नुटि कर्त्तव्ये नुम्करणसामर्थ्यादित्यर्थो नकारादेशे कर्त्तव्ये तत्सामर्थ्यादिति वाच्यम् , स चायुक्तः पुंसि गा इत्यत्र नुमो-

नकारादेशस्य चारितार्थ्यात् शसः शकारस्योरण् रपरसूत्रस्थभाष्यरीत्या शसः परत्वाच्छस इत्यस्यावयवषष्ठीप्राप्तिर्बोध्या किञ्च मित्त्वसामर्थ्यादकः शसोऽचि परे नुम्स्यादित्यर्थेऽक एव नुमापत्तौ रूपासिद्धिः तस्मादिति कृते तु न दोषः शसोऽचोऽसम्भवादचीति न सम्बध्यते तस्मादित्युत्तरस्येत्यस्य प्रवृत्त्याऽचो नुमित्यर्थे दोष इति चेत्तर्हि रामानित्यादौ णत्वदोषस्य वारणे निर्देशाश्रयणे प्रतिपत्तिक्लेश इति सूत्रकाराशयः शसो नः पुंसीत्यपि न युक्तम्, अकः शसवयवेऽचि पूर्वपरयोराचि नत्वादेशापत्तेः एकः पूर्वपरयोरित्यधिकारे पञ्चमी सप्तमी च नैकस्यानित्यत्वबोधिकेति सिद्धान्तात्, अतीति निवृत्तौ तु तत्र प्रमाणन्नास्ति भाष्ये तस्मात्किं एतान् गा इति न्यासान्तरे दोषान्तरोपलक्षणमिति मम दोषो न,

यत्तु औशादेशइत्युक्तम् तन्न औ इत्युक्ते सर्वादेशासिद्धेः.शित्वं व्यर्थम् अथ औशादेशस्तर्हि संहितायामष्टाभ्य औशित्युक्ते गौरवमसंहितायामप्यष्टाभ्य औइति गौरवम् एवमौशि कर्त्तव्ये जश्शसोरनुमीयमानं यद्यपि वहिरङ्गं तथापि नुमागम एव वं-

हिरङ्गः अर्थस्य पुंस्त्वस्याधिक्येनापेक्ष्यत्वात् अर्थकृतबहिरङ्गत्वं नास्तीति तत्त्वप्रकाशिकायां दूषितमेव· किञ्च नुमि कृते ज्ञानगौरवमुकारमकारयोरित्संज्ञा कर्त्तव्या मिदचइत्यस्योपस्थित्याऽचः परत्वं बोधधनीयं संयोगान्तलोपे पदसंयोगसंज्ञाअपेक्ष्यते इति पाणिनेरनियोक्ता न दृश्यतइति युज्यताम्, यदि तस्मादित्यस्य प्रत्याख्यानेऽत्याग्रहस्तर्हि शसो नः पुंसि इत्यत्राको दीर्घ इति पूर्वसवर्ण इति चानुवर्त्य पञ्चम्या विपरिणम्याकः पूर्वसमर्णदीर्घात्परस्येति व्याख्यायतां किमनेन तस्मादित्यनेनेति· तत्वप्रशिकायां स्पष्टम्।

हल्ङ्याब्भ्यो दीर्घात्सुतिस्येति,

अत्र मनोरमायां हल्ङ्यापस्सोरित्येव सूत्रयितुमुचितम् तत्र शब्दरत्ने सुइदं तिस्योरुपलक्षणमन्यथाविभाराज्यमिति न सिध्येत्, अत्रिभरसूइति स्थितेरुत्वासिद्ध्या संयोगान्तलोपे रोरीति लोपे संयोगान्तलोपस्य पूर्वत्रासिद्धत्वाद्ढ्लोप इति दीर्घो न स्यादिति,

अयं ग्रन्थः शेखरविरुद्धस्तत्राहि अजर्घाइति भाष्यप्रयोगात्पूर्वत्रासिद्धमित्यत्र पूर्वपदेन लोप·

सूत्रस्याग्रहणबोधनादित्युक्तम् ,

अत्रेत्थं विरोधपरिहारः भाष्यप्रयोगेण साधुत्वस्यासति पक्षे स्वीकारादिति, प्रकृते तु तिस्योर्ग्रहणयत्ने स्थिते तत एव साधुत्वं न भाष्यप्रयोगेण साधुत्वस्यास्य सति पक्षे स्वीकारात् नासूया कर्तव्या यत्रानुगमइति पङ्क्तिर्विंशतीति सूत्रस्थभाष्यादिति परिगणिताः,

वस्तुतस्तु शेखरोक्तः सम्यगेव पितुराज्यमित्यत्र सूत्रकारसिद्धान्तेऽपि संयोगान्तलोपस्यासिद्धत्वाद्दीर्घो न प्राप्नोतीति रोरीति लोपस्याश्रयासिद्धत्वेऽपि संयोगान्तलोपस्यासिद्धत्वेनोक्तभाष्यप्रयोगेणैव, यद्वा नमुन इत्यत्र न ने इत्येव कर्त्तव्ये मुग्रहणं योगविभागार्थं नेति मुनेति क चिदसिद्धत्वन्नेतिव्याख्याय प्रयोगाणां निश्चित्य नातिप्रसङ्गः आश्रययोगविभागार्थे नेति मुनेति तदसिध्यर्थत्वात् अत एव प्रत्ययः पर इति रेफस्य लोपः विसर्गः अजर्घा इति भाष्यस्याश्रयासिद्धत्वेऽप्युपपत्तिरस्ति,

अथ वा कल्प्यमप्यत्रैव तात्पर्यं तस्य दोषः संयोगेत्यादिवार्तिकानि योगविभागसिद्धानीति तत्त्वम् ।

वदव्रजहलन्तस्याच हलन्तोऽच इत्येव सिद्धे वदव्रजयोर्ग्रहणम् अतो हलादेरिति वैकल्पिकदीर्घ बाधनार्थं,

ननु वदव्रजयोरच इत्येवास्तु अज्ग्रहणसामर्थ्याद्धलन्तस्याच इत्यर्थो भविष्यति वदिव्रजयोरवयवस्याच इति नार्थः अतोल्रान्तस्येसतोऽत इत्यनुवृत्त्यैव सिद्धे तस्य वैयर्थ्यात् अजन्तार्थत्वन्तु नास्ति सिचि वृद्धिः परस्मैपदेष्वित्येव सिद्धेः अनिगन्तार्थमिदमित्यपि न अचिकीर्षदित्यत्र ण्यल्लोपाविति वचनादतो लोपविधानात् अपासीदित्यत्र वृद्धौ नास्ति विशेषः अजन्तानामित्येन सिद्ध्यसम्भवात् तदेतदाहुर्भाष्यकाराः एवन्तर्हि इदमेव हल्ग्रहणमनुसृतं हलग्रहणमनिगर्थम् अज्ग्रहणमनिगर्थमिति अभाङ्क्षीदराङ्क्षीदित्यादिसिध्याऽच आन्तर्याश्रयणेऽपि सिध्यर्थमित्यर्थः अन्यथाचकासीदित्यादावप्यतिप्रसङ्गः स्यात् तदुक्तं भाष्ये सिद्धान्ते व्यवाये तु न भवति यदि सिचानन्तर्यं विशेष्यतइति अथानिगर्थमिति भाष्यस्याथमर्थः अग्रहणाभाव इक्परिभाषोपस्थाने अभैत्सीदित्यादावेव स्यान्न तु अभाङ्क्षीदित्यादाविति अन्तग्रहणन्तु स्पष्टार्थमन्यथा हलोऽच

इत्युच्यमाने अजन्ताङ्गस्य हलः स्थाने वृद्धिः स्यादिसयमप्यर्थ आशङ्क्येतेति कैयटे स्पष्टार्थम् , अत्रैष विचारोऽनुचित शेखरे स्पष्टत्वात् ।

न पदान्ताट्टोरनाम् ,

विशेष्यविशेषणभावादेवान्तपदलाभे स्पष्टार्थन्तदिति शेखरः पदान्ताद्वेति सूत्रेशेखरः अन्तग्रहणं पदान्तकार्य्यार्थम् अन्यथा पदविधित्वापत्त्या समर्थपरिभाषोपस्थितेरसमर्थे तिष्ठुति कुमारीच्छत्रं हर देवदत्त इत्यादौ न स्यादित्युक्तम् तस्यायं भावः न पदान्तादित्यत्र तु न समर्थपरिभाषयोपस्थितिः षण्णामित्यत्र तदुपस्थित्यैव न पदान्तादित्यस्यानुपस्थित्याऽनामित्यस्य वैयर्थ्यापत्तेः समर्थपरिभाषां प्रति त्रिपादीस्थस्य नपदान्तादित्यस्यासिद्धत्वान्न तस्या अत्रोपस्थितिरिति न पूर्वापरविरोधश्शेखरस्येति पण्डिताः, न पदान्तादित्यत्र येन विधिरित्यस्यानित्यत्वबोधनार्थमन्तग्रहणम् तेन समासप्रत्ययविधौ प्रतिषेध इत्यादिवार्तिकस्य सूत्रकारेणापि बोधनमिति नापूर्वम् किञ्च तिङ्ङतिङ इत्यत्र तिङ्ग्रहणं पचतिभवति इत्यादौ मा भूदिति कृतम् । तत्र तु समर्थ इत्येव सिद्धं तत्रैकार्थीभावएव सामर्थ्यमित्यतिङिति ज्ञापकात्पद

कार्य्येऽपि क चित्समर्थपरिभाषानुपस्थित्यैव तु· कि सिद्धे पदान्ताद्वेत्यन्तग्रहणमपि स्पष्टार्थम्, किञ्च विशेष्यविशेषणभावे कामचारस्यापि बोधनार्थमन्त· ग्रहणं; तेनोतश्च प्रत्ययादसंयोगपूर्वात् उदोष्ठ्यपूर्व· स्येत्यत्रोकारयोः संयोगपूर्वः ऋकारो य ओष्ठ्यपूर्व· इत्यादि व्याख्यातं भाष्ये सङ्गच्छते, अन्यथोकारा· न्तस्यासंयोगपूर्वत्वग्रहणे ऋकारान्तस्यौष्ठ्यपूर्वत्वग्रह· णे वा दाश्नुहि इत्यत्र हेर्लुक् स्यादुकारान्तप्रत्ययस्या संयोगपूर्वत्वाद्, उकारोयोऽसंयोगपूर्व इति व्याख्याने न दोषः, एवं संकीर्ण इत्यत्र धातुर्य ऋदन्तः स ओष्ठ्यपूर्व इत्यर्थे अत्रैव स्यादिति येनेत्यत्र भा· ष्ये स्पष्टम्।

ङसि ङसोश्च,

अत्र ङिदसीत्येवसिद्धे ङस्ग्रहणं स्पष्टार्थमिति प· ण्डिताः, ङिदस इत्युक्तेः प्रत्ययग्रहणानापत्त्या पदा· न्तादित्यस्य सम्बन्धे हरेरित्यादौ न स्यात् नियमा· त्पदान्तादेङोऽति पूर्वरूपं चेन्ङिदसोऽकारस्यैवेति पुंसोऽसुङिति असुङित्येकदेशस्यासोऽनुकरणादि· च्छायपाचि अस्यतीति भवति तस्य देवदत्तोऽस्य· तीत्यादावेव प्रवृत्तिः स्यात्प्रकृतिवदनुकरणमित्य·

तिदेशेन ङिदसः सम्भवात् अजहत्स्वार्थपक्षे प्रक्रियादशायां कल्पने तास्यासोऽर्थवत्वाच्च अत एव नमस्कृत्येत्यत्रनमःपदस्यार्थवत्वेनोपपदाविभक्तिरित्यने] न द्वितीयावारणं नत्वर्थवत्परिभाषया नमसोऽनर्थकत्वे गतिसंज्ञाविरहान्नमस्पुरसोरिति सत्वस्यैवानापत्तिः अनिनस्मिन्ग्रहणेऽनर्थकस्यापि ग्रहणाच्च प्रत्ययाप्रत्ययोरिति प्रत्ययाङिदसो ग्रहणं तु न, सा परिभाषैव नास्ति कथमन्यथाचार्य्यो ङसो ग्रहणं कुर्य्यात् ङसश्चेत्यपि न युक्तम् ङश्चसश्चेतिद्वन्द्वे प्रत्येकादेशापत्तेः ङान्तसान्तपदसम्बध्यतिपरस्येति नार्थः,

नन्वेवन्तर्हि एङः पदान्तात् ङिदन्त इति ङसोश्चातीति वा वक्तव्ये पृथक्सूत्रारम्भसामर्थ्यादेवास्य पदान्तविषयत्वादपदान्त एङ् तु ङसोः परत एव सम्भवतीति न दोष इति चेत्सत्यम् ङसिङसोर्ग्रहणे तु सामर्थ्यकल्पनाश्रयणीया स्यात्प्रत्ययत्वस्य निश्चयात् अत एव ऋत उदित्यस्य व्याख्यानमृदन्तादिदिति सङ्गच्छते ङसिङसोः प्रत्ययाभ्यामङ्गाक्षेपादन्यथा कर्तुः अस्यतीत्यत्रोकार एकादेशपरभाष्यं न सङ्गच्छते ङसिङस्प्रत्ययाभ्यामङ्गाक्षेपः प्राप्नोतीति

पदादतस्तथाभूतात् व्याख्यानाच्च ङिदसम्भवा-
त् पदान्तग्रहणस्योत्तरार्थत्वेऽपि ङिद्ग्रहणान्मध्ये-
ऽसम्बन्धो ज्ञायते सख्युर्यः पत्युर्नः जनिकर्त्तुरित्या-
दिनिर्देशैः प्रत्ययाप्रत्यययोरिति परिभाषाश्रयणेन वा
ङिद्ग्रहणे तु प्रतिपत्तिक्लेश एवेति दिक् ।

समः समि,

अत्र सूत्रे शेखरे समो मिङिति ङागिति वा
न कृतं परिभाषाज्ञानगौरवापत्तेरित्युक्तम् , तत्र सा-
कच्कार्थत्वात् सम्यादेशस्यान्यथा समकअच इति
स्थिते मिङादेशे ङित्त्वेऽस्य प्राप्तः मिङादेशस्य ङि-
त्त्वादन्त्यस्य स्यात् , समाधानन्तु बहिरङ्गकुत्सादि-
निमित्तकत्वेनाकचो बहिरङ्गत्वादादेशोत्तरमेवाकजि-
ति, अथैतत्सूत्रभाष्यप्रामाण्येनात्राकचोऽनभिधानमेवे-
ति पण्डिताः,

वस्तुतस्तु समः समीति सूत्रेऽकचोऽनभि-
धानकल्पनं भाष्यप्रामाण्येन नोपलभामहे किन्तु इ-
दमोऽन्वादेशेऽशनुदात्त इति सूत्रे भाष्ये विचित्रास्त-
द्धितवृत्तय इत्यकच् न ज्ञायते इत्युक्तम् तद्भाष्यप्रा-
माण्येनात्राकचोऽभावे मिङित्युक्ते रूपविशेषोक्तिः
शेखरस्य युक्तैव, किञ्च सम्यगर्थसशब्दे कुत्सासम्भ-

वोऽपि नास्ति सूत्रकारेण तु समिग्रहणं विष्वग्देव-योरित्यनुवृत्तिर्मा भूदिति कृतम् ,यदा तु टेरित्यनुवर्त्य सम इत्युच्यते तदा न किञ्चिद् दुष्टमिति तत्वप्रकाशिकायां स्पष्टम् ।

सार्वधातुकार्द्धधातुकयोः,

ननु पिदार्द्धधातुकयोरित्येव कर्त्तव्यमार्द्धधातुकसाहचर्य्याद्धातोरित्युच्चार्य्य विहितस्य पितोग्रहणात्सुलु इत्यादौ न दोषः सार्वधातुकमपिदिति सूत्रं मास्तु, समाधानं साहचर्य्यमनित्यमितिज्ञापनार्थत्वं सूत्रस्येति कृत्वोर्थग्रहणं सुच इति न्यासेन शेखरे खण्डितमेव फलन्तु सिजभ्यस्तावीदिभ्यश्चेत्यत्र सिच्साहचर्य्यमनादृत्याभ्यस्तात्परस्य ङित्सम्बन्धिनो लङ्स्थानिकस्यापि झेर्जुस् सिद्धाऽददुः अबोभुवुरिति पाण्डिताः,

वस्तुतस्तु सार्वधातुकमपिदिति तसादीनांङित्वार्थं तेन हतो हथ इत्यादावनुनासिकलोपः ग्रहिज्यादिषु सम्प्रसारणादि सेत्स्यति,

न च शिङः पित्संज्ञाविज्ञानादपि तिङ् दुर्लभइति वाच्यम् ?

तिङ्संज्ञाविधावौपदेशिकपित्त्वस्य सामर्थ्येना-

श्रयणात्सार्वधातुकप्रदेशे तु पिद्ग्रहणमेवास्तु,

किञ्च अपिद्ग्रहणमसंयोगाल्लिट्कित्युत्तरार्थमपि वाच्यम् पिदार्धधातुकयोरिति तु मिति ङितीति निषेधादौपदेशिकापित्स्वेव प्रवर्त्तते न दोषः कश्चिदिति चेत् प्रदेशेषु पित्पदेन कृत्रिमस्यैव ग्रहणे नाभ्यस्तस्ताचि पिति इति निर्देशेऽपि इत्संज्ञको यः पिदौपदेशिक इत्यर्थस्यावश्यकत्वेऽपि शास्त्रे उभयगतिविज्ञानात्तस्यानुदात्तोङिदुपदेशाल्लसार्वधातुकमिति पिदित्युच्यमाने एव श्नुचोः पिति रुदादिदिभ्यः पिति तुरुस्तुशम्यमः पिति यकः पिति अकृत् पितो दीर्घ इत्यादौ संदेहापत्तिरेव स्यात् कृत्रिमपितो ग्रहणे सत्यपि चेत् ङित्वस्यैवाभावे सुप्तिङन्तस्येति पदत्वानापत्तिस्तथा च रुदिहीत्यादौ तिङ इति निघातानापत्तिः उभयोः संज्ञासंज्ञयोर्ग्रहणं पूर्वएवेत्युक्तम् ,

अथ पित्संज्ञा न क्रियते सार्वधातुकप्रदेशेषु संज्ञिनिर्देशोऽस्तु तिङ्शिदितिसार्वधातुकसंज्ञाथान्तु तिङः शब्दादार्द्धधातुकयोरित्यादिआर्द्धधातुकतिङ्शिदिति वक्तव्यम् लिट् चेति वचनाल्लिडादेशतिङामार्द्धधातुकत्वं यत्र शितोऽसम्भवस्तत्र तिङ्ग्रहणमेव

सार्वधातुकस्थले कार्यं सार्वधातुकमपि तिङ्शिदपि-दिति वक्तव्यम् तिङ्शितियगित्यत्र धातोरित्युच्चार्यविहिततिङ्शितियग्विधानाल्लिहो दुह इत्यादौ कर्म्मशासि न दोषः, शिदार्द्धधातुकयोरित्यत्रार्द्धधातुकसाहचर्याद् व्रीहीनित्यादौ न गुणः, अपितः शितोङित्वे च घेर्ङितीति गुणो दुर्वार इति वाच्यम्, एवन्तर्हि धातोस्तिङः शिदपिदिति वक्तव्यम् विहितविशेषणत्वाददोष इति केचिद्वदन्ति ।

इदुदुपधस्य चाप्रत्ययस्य—

अत्र सुसे एकादेशशास्त्रनिमित्तविसर्गस्थानेऽनेन सूत्रेण न षः कस्कादिषु भ्रातुः पुत्रस्य पाठादिति अत्र पूर्वपक्षः षत्वतुकोरसिद्ध इति षत्वे कर्त्तव्य एकादेशस्यासिद्धत्वादिदुदुपधस्येत्यस्याप्रवृत्तेः कस्कादिषु पाठसामर्थ्यात् षत्वमिति मातुः कृपेत्यादौ शङ्कैव नास्तीति तन्न—

पदान्तपदाद्योरेकादेशस्यैवासिद्धत्वमिति भाष्यसिद्धान्तात् तेन ज्ञापकत्वं सम्यगेव तेन परिवीषु परिजीषु इत्यादौ षत्वमिति व्याव्येञ्भ्यां क्विपि ग्रहिज्येति सम्प्रसारणे पूर्वरूपे हल इति दीर्घे आदेशप्रत्यययोरिति सुपः सस्य षत्वे कर्त्तव्ये पदान्त-

पदाद्योरेकादेशाभावात् पूर्वरूपस्य नासिद्धत्वमन्य-
थाऽकारेण व्यवधानादिणः परत्वाभावात्तस्य ष-
त्वं न स्यात् यथा वृक्षेच्छत्रमित्यत्रापि सिद्धएकादेश-
इति च्छे चेति तुक न,

वस्तुतस्तु इग्यणः सम्प्रसारणमित्यत्र साचः स-
म्प्रसारणमित्येव सूत्रमस्तु सम्प्रसारणाच्चेति मास्तु-
वृक्षेच्छत्रमजपेच्छत्रमित्यत्र तुङ्निवृत्त्यर्थषत्वे तुकि
पदान्तपदाद्योरेकादेशोऽसिद्ध इति नियमः स्वीकार्यः

एवञ्च भ्रातुः पुत्रशब्दः कस्कादिषु त्विद्यर्थ-
एव न ज्ञापक इति समाधानं विभावयन्तु सुधिय-
इति पण्डिताः,

वस्तुतस्तु वृक्षेच्छत्रमित्यादावसिद्धत्वे पदा-
न्ताद्वेति नियमं विना न सिध्येदतो नियमोऽयमाव-
श्यक एतन्नियमाश्रयणात्सम्प्रसारणङीषुसु सिद्ध
एकादश इति वक्तव्यमिति वार्तिकं कर्त्तव्यं भवति
शकहूषु परिवीषु वृक्षेच्छत्रम् अजपेच्छत्रम इति वा-
र्तिकोदाहरणानि नियम एव सिध्यन्ति अत्र नियमे
शङ्कितं भाष्ये यदि पदान्तपदाद्योरेकादेशोऽसिद्ध-
स्तर्हि ओषधौषधीत्यत्रासिद्धत्वाभावे षत्वं प्राप्नोति
शसि पूर्वसवर्णदीर्घे सस्य रुत्वं विसर्गः कः कुत
इति कृधिकृतेष्वनिदितेरिति सत्वे तत्र समाहितं
भाष्यकारेणैव कस्कादिषु भ्रातुः पुत्रस्य पाठादेशा-

त्परस्य न षत्वमिति ज्ञापकस्य सजातीयपक्षे या कुष्त्रोः परत एव न षत्वं तेन शकहूषु परिवीष्वि-त्यादावदोषः षत्वतुकोरसिद्ध इत्यत्र पूर्वपदान्तपर-पदाद्योरेकादेशोऽसिद्ध इति व्याख्यातं तत्रैव भाष्ये तेन पदान्तपदाद्योरिति नियमे सिद्धे सिद्धं वृत्रह-च्छत्रमित्यादिपदशब्देन पदयोग्योऽपि गृह्यते अधी-त्यप्रेत्येति भाष्योदाहरणात् परिविपूर्वस्येणः क्विब-न्तस्य तुगभावः परिवीयेति ल्यबन्ते च न तुक् अनभिधानात् तदुक्तं प्रत्ययलक्षणमित्यत्र भाष्ये वक्ष्यति अत्र परिहार इहापि परिविरिति शास्त्रपर-विप्रतिषेधेन परत्वाद्दीर्घत्वं भविष्यतीति आशयमाह कैयटः सति प्रत्यये यत्कार्यं भवति तल्लुप्ते ऽपि भवतीति सूत्रार्थः परिवीयेत्यादौ च सति प्रत्यये दीर्घो दृष्टो न तुगिति परिवीरित्यत्रापि दीर्घ एव भवतीति एतेनाधीत्य प्रेत्येत्यत्र तु दीर्घौ दृष्टौ तेनात्र तुक्यसिद्ध इति युक्तमेव अत एव औषधीत्य-त्रासिद्धत्वान्न ष इति भाष्ययोरविरोध इति केचित्,

आडजादीनाम् न चाजादीनामपि लङ्लुङ् लृङ्क्ष्वित्यडेवास्तु किमनेन सूत्रेण आटश्चेति अट-श्चेत्येवास्तु अश्वपो हसन्नित्यत्राङ्गार्ग्यगाल्वयोरिति स्वपोऽडागमे वृद्धिस्तु न अटश्चेत्यत्रोपसर्गादृतिधा-

तावित्यतो धाताविन्यपकृष्य तेन धात्ववयवेऽच्येव वृद्धिरिति न दोषः आण्नद्या इत्यत्र तु अडिति व-क्तुमशक्यः बहुश्रेयस्यै पत्यै इत्यादौ वृद्धिबाधकमतो गुण इति पररूपं माभूदिति अड्विधानन्तु बहुश्रेय-स्यामित्यादौ नुड्बाधनेन चरितार्थमटश्चेति धात्व-वयवेऽच्येव प्रवर्तते आटि सति तु वृद्धिरेचीति वृद्धिरित्याटश्चेति सूत्रस्थशेखरग्रन्थः अद्धातोः शेखरे तु अटश्चेत्येवास्तु आर्तीदधतेत्यादौ तु न दोषः अतो गुणे नाट इति न्यासेन सिद्धत्वात्,

एवञ्च बहुश्रेयस्यै इत्यादावटश्चेति वृद्धिं वि-धाय पररूपबाधकमुभयथा बहुश्रेयस्यै इत्यादौ पर-रूपं स्यादेव आण्नद्या इत्युक्ते स्याट्याटोर्दीर्घान्त-त्वान्नास्ति पररूपशङ्का तथापि पररूपं परत्वात्स्या-द्बहुश्रेयस्यै इत्यादौ तदर्थमाण्नद्या इति वक्तव्यम-टश्चेति चकारेण पुनर्वृद्धिविधानं बाधकबाधनार्थं तेनार्थेनैवाटः पररूपमात्रं न इति न्यासेऽपि तदेव ओमाङोरुसीति न वक्तव्यमिति भाष्योक्तेरुभयथा उस्योमाङ्क्ष्वाट इति नारम्भणीयमिति पण्डिताः,

माङ् योगे इति सूत्रेआडजादीनामिति प्रत्या-ख्यानपरभाष्यं तु—

अजादीनामटा सिद्धं वृद्ध्यर्थमिति चेदटः ।

अश्वपो हसतीत्यत्र धातो वृद्धिमटः स्मरेत् ।

कथमिति चेद्योगविभागः करिष्यते अटः अचिः वृद्धिर्भवति ततः उपसर्गादृति वृद्धिर्भवति ततो धातावित्युभयोः शेषः अतो भाष्याच्चकार-प्रत्याख्याने स्पष्टमायाति आटीदित्यादौ पर-रूपमाशङ्क्योक्तं पररूपं गुणेनाट इति, अनेनैव सिद्ध उस्योमाङिति न वक्तव्यं भवतीति सदोमाङोरुसि तत्समिति बहुश्रेयस्यै इत्यादौ वृद्धिस्तु इति से पररूपे निषिद्धे प्रतिबन्धकाभावाद्वृद्धिरेचीत्येव अत्र पक्षे आणूनद्या इति वक्तुं शक्यः अटश्चेतिचकार ओ-माङोश्चेति चकार उस्योमाङिति पररूपनिषेधार्थं च वार्तिकं नाश्रयणीयं भवति अटश्चेत्यत्र भाष्यरीत्या तु आट इति वक्तुश्चकारेण पररूपवारणे सिद्धे उ-स्योमाङिति न कर्त्तव्यं धात्वपकर्षणाटश्चेसस्यापक-र्षणाप्राप्त्या आणूनद्या इति दीर्घोच्चारणमावश्यकं-वृद्धिरेचीति बाधित्वा पररूपापत्तेः न चाड्विधान-सामर्थ्यात्पररूपाभावः शङ्क्यः आणूनद्या इति वक्तव्यं-नाङ् इति गौरवान्न कर्त्तव्यमित्याह,

केचित्तु वा सुप्यापिशलेरित्यत्रापिशलिग्रह-णेनैव सिद्धे वा ग्रहणमट इत्यत्रानुवृत्त्यर्थं व्यवस्थित-विभाषार्थं तेनाश्वपो हसन् बहुश्रेयस्यै इत्यादिसिद्धं,

धात्वपकर्षो वृद्ध्यर्थं चकारकरणं दीर्घोच्चारणमाट इति न कर्तव्यमेव एवञ्चाट्स्थाटोर्दीर्घोच्चारणमाणूनद्या इत्यत्र दीर्घोच्चारणमप्यनावश्यकमेव व्यवस्थितविभाषया सिद्धेः यद्वा करावयवाङ्गुल्यादौ हस्तपादाङ्गुलिरित्या· दिरूढव्यवहाराद्याटस्याटोष्टकारोकारस्याप्यवयवइत्य· टइति वृद्धिः सिद्धेवेत्याहुः,

न चाडजादीनामिति छन्दसि हलन्ते अपुनहू· आविसादौ दीर्घार्थमिति वाच्यम् छन्दोर्थं बहुलं दीर्घो· दृश्यते तद्यथा पुरुषो नाह इति भाष्ये समाधानाद्,

न चेणस्त्योर्लिङि ञ्णौ इणो यणिति यणि श्नसो· रल्लोपे अटि आयन्नासान्निति न सिध्येदिति वाच्यम् ?

इणस्त्योरन्तरङ्गतः इडागमेऽट इति वृद्धौ ना· स्ति दोषः इणो यणित्यत्रैरनेकाच इत्यत एरित्यप· कृष्टः श्नसोरल्लोप इत्यत्रादिति तपरकरणात् पश्चा· द्यणल्लोपयोरप्राप्तेनचागमेऽपि वार्णादाङ्गमिति न्याया त्प्रागेव यणूलोपौ प्राप्नुतः इत्याद्वचनामिति वाच्यम् इणस्त्योरन्तरङ्गतइति भाष्याच्छ्वोः शूडिति स तु क· निर्देशाच्चेयमनित्याऽन्यथा गत्वाच्छस्य शादेशे तुको· ऽप्राप्त्या सनिर्देशो व्यर्थस्स्यादिति भाष्ये ध्वनितम्,

भूवादयो धातवः,

क्रियावाचिनः किम् याः पश्यति न चास्य वाशब्द·

स्य लाक्षणिकत्वान्न धातुसंज्ञेति वाच्यम् भ्वादिषु लाक्षणिकानामपि अञ्चत्यादीनां दर्शनेनैतद्विषये परिभाषाया अप्रवृत्तेः,

नकारजावनुस्वारपञ्चमौ झलि धातुषु
शकारजस्सकारश्चे षाट्टवर्गस्तवर्गज·
इत्यभियुक्तोक्तेरिति मनोरमोपरि शब्दरत्नग्रन्थः,

अत्रायं पूर्वपक्षः–धातुसंज्ञाम्प्रति अनुस्वारस· वर्णादीनामसिद्धत्वेन प्रतिपदोक्तस्यैवासम्भवेन लाक्षणिकपरिभाषया याः पश्यतीत्यत्र दोष इतिशब्द रत्नग्रन्थोऽसङ्गतः, किञ्च क्रियावाचिनः किमित्यस्य वाकरोति वाभवतीत्येव प्रत्युदाहरणं सम्भवति वा शब्दस्य धातुत्वेऽधातुरितिनिषेधात्प्रातिपदिकत्वा- भावे सुपोऽनुत्पत्त्या पदत्वाभावात् तिङ्ङतिङ इति निघातो न स्यात्,

अत्र समाधानम्–अर्थवत्सूत्रेऽधातुग्रहणस्य त्यागेन वा करोतीत्यावदोषः न चाहन्नित्य· स्यापि प्रातिपदिकत्वेन लोपापत्तिरिति वाच्य· म् न लोपोऽतिङ इति न्यासेन वारणात् राजीयती· त्यादौ तु न दोषः प्रत्यासत्त्या तिङन्तनिरूपित· यस्य पदत्वं तन्निमित्तात्परस्य लोप इत्यर्थाद्रामानि· त्यादौ तु नलोपो न अन्यथा तस्माच्छसो लोपः

इत्येव ब्रूयादिति पण्डिताः,

वस्तुतस्तु वाशब्दे निपातसंज्ञाप्राप्ता धातुसंज्ञाया-बाधिका भविष्यति धातुसंज्ञा भवतीत्यादौचरितार्था निपातसंज्ञा चहप्रभृतिषु चरितार्था वाशब्दस्य-परत्वान्निपातसंज्ञैव या पराऽनवकाशा चेत्याकडारा-देकेत्यत्र सूत्र ऊकालसूत्रे च भाष्ये प्रसिद्धत्वात् अन्तरङ्गत्वं तु भ्वादिवादिगणसापेक्षत्वेनोभयोः संज्ञयोः सममेव गणोपस्थितशब्दबाहुल्येन वहिरङ्गता-तु धातुसंज्ञाया एव, भुवश्च महाव्याहृतेरित्यत्र महा-व्याहृतिग्रहणात् यावत्पुरानिपातयोरित्यत्र निपात-ग्रहणाच्च निपाते प्रतिपदोक्तव्यवस्थेति मनोरमादि ग्रन्थकाराशयः,

प्रातिपदिकसंज्ञाया निपातसंज्ञा बाधिकैव विरोधात् निपातः प्रातिपदिकमिति विशेषवच-नात् रामानित्यादौ सस्य लोपस्तु न कृतः सस्य नत्वे नलोपे तस्यासिद्धत्वाद्राममासयतीत्यादौ दीर्घा भावे तुको भावार्थत्वात्तस्येति अथ धातुग्रहणप्रत्या ख्याने यद्याग्रहस्तवास्ति चेत्तर्हीत्थं न्यस्यतां नलोपः प्रातिपदिकान्तस्येति तावतापि मात्राद्वयलाघवादिति तत्त्वप्रकाादिकायां स्पष्टम् ।

अचः परस्मिन्पूर्वविधौ,

अत्र शेखरः-अत्र सूत्रे प्रयोगेऽचस्थानिक इत्यर्थो न तु सूत्रे स्थानित्वेनोद्देश्यताचस्थानिकेत्यर्थस्तेन णिलोपादेरनेन स्थानिवत्त्वं सिध्यति, अत एव चङ्परनिर्ह्रासे ण्यन्ताण्णिचि अवीभवदित्यादिसिध्यर्थो निषेधः सार्थकः इति जुहुव इत्यत्र शेखरोक्तप्रयोगः परनिमित्तकत्वाभावेऽपि शपः परनिमित्तत्वेन परम्परया लोपनिमित्तत्वेन स्थानितयाऽत्रादेशस्याभावेन स्थानिवत्त्वाभावाच्छ्लत्वमाश्रित्य न गुण इत्युक्तम् तत्पूर्वापरविरुद्धम्, वस्तुतोऽकारस्यश्लुत्वेन स्थानिवत्वस्य दुर्वारत्वादिति पण्डिताः, तत्रस्थविरोधपरिहारः साक्षात्परनिमित्तकता तत्र प्रायोगिकस्थानिकता परम्परया प्राप्ता सौत्रस्थानितात्र, एवमेव हि प्रयोगाणां गतिर्भवति नान्यथेति बोध्यम् ,

यत्तु वेरित्यत्र स्थानिवत्त्वेन उपात्ताचस्थानिसत्त्वाच्चङ्परनिर्ह्रासे इति वचनं वारि आख्यादवीव इत्यादौ चरितार्थमतः सूत्र एवचस्थानिक इत्युक्ते सर्वेष्टसिद्धिरित्युक्तम् , तन्न-टिपदेनाच एव ग्रहणादत्रादेशाभावेनादोषात् अत एव मरुतमाचष्टे मारयतीति वृद्धौ कृतायां न स्थानिवद्भाव इति दिक् ।

इत्युत्तरपक्षावली समाप्ता ।

रु० आ०

१५ विषमपदवाक्यवृत्तिः। पदवाक्य प्रमाणपारावारीणराघवेन्द्राचार्यविरचिता। (लघुशब्देन्दुशेखरस्य कारकप्रकरणपर्यन्तस्य व्याख्यानम्)। २—८

१६ श्रीधरीया। पण्डित श्रीश्रीधरशर्मविरचिता। ( लघुशब्देन्दुशेखरस्य प्रथमाकारकान्तं व्याख्यानम्)। १—८

१७ परिभाषेन्दुशेखरः। श्रीमन्नागेशभट्ट विरचितः। म० म० श्रीभैरवमिश्रविरचितया भैरवित्यपराख्यपरिभाषाविवृत्त्या-तत्त्वप्रकाशिकयाटीकया च सहितः। २—८

१८ वाक्यपदीयः। पुण्यराज टीकासहितः। प्रथमकाण्डः। १—०

१९ परमलघुमञ्जूषा। श्रीमन्नागेशभट्टविरचिता। म० म० पर्वतीय पं० श्री नित्यानन्दपन्तेन टिप्पण्या परिष्कृत्य संशोधिता। ०—८

२० वैयाकरणसिद्धान्तलघुमञ्जूषा। श्रीमद्दुर्बलाचार्यविरचित "कुञ्जिका", श्रीमद्बालम्भट्ट विरचित "कला" इति टीका द्वयेन संवलिता। संपूर्णा। १५—०

२१ वैयाकरसिद्धान्तलघुमञ्जूषा। " " "आचार्य्यपरीक्षोपयोगि "शक्तिप्रकरणमारभ्य आकाङ्क्षा-निरूपणप्रकरण" पर्यन्ता। द्वितीयावृत्तिः। ३—८

२२ वैयाकरणभूषणसार सपरिष्कृत दर्पण व्याख्या सहितः। ४—०

२३ वैयाकरणभूषणसारः। सरलाटीका सहितः। १—८

२४ प्रौढमनोरमा। म० म० श्रीभट्टोजिदीक्षित विरचिता तत्पौत्र म० म० पण्डित श्रीहरिदीक्षितविरचितलघुशब्दरत्नाख्य-व्याख्या समेता। म० म० पण्डित श्रीभैरवमिश्रविरचित-शब्दरत्नव्याख्या युक्ता। श्रीयुत भाण्डारित्युपाह्नमाधव-शास्त्रिविरचित प्रभानामकटिप्पण्या समलङ्कृता। श्रीयुत-जगन्नाथशास्त्रिविरचितयाअव्ययीभावस्य शब्दरत्नप्रदीप-कनामक टिप्पण्याऽलङ्कृता। अव्ययीभावान्तः प्रथमोभागः। ५—०

२५ प्रौढमनोरमा। शब्दरत्न व्याख्यासहिता। सम्पूर्ण। १२—०

२६ प्रौढमनोरमाव्याख्याकल्पलता। श्रीकृष्णमित्रकृता। (अव्ययीभावपर्यन्ता)। ३—०

२७ वैयाकरणसिद्धान्तकौमुदी। श्रीमद्भट्टोजीदीक्षित विरचिता। सभाष्यशिक्षाऽष्टाध्यायीगणवार्त्तिकधातुपरिभाषोणादिसूत्र-फिट्सूत्रलिङ्गान[illegible]ैः सहिता। अष्टाध्याय्यष्ट-काराद्यनुक्रम सूचीभिः संवलिता। मूलमात्र गुटका। ३—०